५५६४

नं० ५५६४ – घ

गणेशकवचात् स्वाह्मान्त–
शक्तिमालापर्यन्तं (१७)
सप्तदश विविधग्रन्थाः
(तन्त्रम्) पत्राणि २६३
संपूर्णम्

34

गणेशकवचं

नं० १०९८

मं.

१०६८ क

[illegible]

२५२ पन्नानी [illegible]

#5564

Part	F	P
1st	2	18 – 3
2d	2	19 – 4
3d	5	20 – 8
4th	2	21 – 9
5th	4	22 – 3
6th	3	23 – 2
7th	5	24 – 5
8th	3	26 – 2
9	1	27 – 9
10	1	28 – 5
11	1	
12	1	
13	2	
14	2	
15	3	
16	12	

50
49
164
263

Pri 17 [illegible] # 30 ff 263

F 169

Gopal [illegible]

गणेशकवचात् स्वाहान्तशक्तिमाला पर्यन्तं
(१७) सप्तदश विविधग्रन्थाः (तन्त्रम्)
पत्राणि २६३ (सम्पूर्णम्)

ॐ श्रीगणाधिपतये नमः ॐ महादेवग
णेशस्य वरदस्य महात्मनः कवचं ते प्रव
क्ष्यामि वज्रपंजरकाभिधम् ॐ अस्य श्री॰
महागणपतिवज्रपंजरकवचस्य श्री॰
भैरव ऋषिः गायत्रं छंदः श्रीमहागण
पतिर्देवता गं बीजम् ह्रीं शक्तिः कुरु
कीलकम् वज्रविद्यासिद्ध्यर्थे श्रीमहा॰
गणपतिवज्रपंजरकवचपाठे विनियो॰
गः ॐ विघ्नेशं विश्ववंद्यं सुविपुलयश
सं लोकरक्षाप्रदक्षम् साक्षात्सर्वापदा
सुप्रशमनसुमतिं पार्वतीप्राणसूनुम्
प्रायः सर्वासुरेंद्रात्ससुरमुनिगणैः सा॰
धकैः पूज्यमानम् कारुण्येनांतराया॰
मितभयशमनं विघ्नराजं नमामि ॐ
ह्रीं श्रीं गं शिरः पातु महागणपतिः प्रभुः
विनायको ललाटं मे विघ्नराजो भ्रुवो म॰
म पातु नेत्रे गणाध्यक्षो नासिकां मे गजा
ननः श्रुती मेवतु हेरंबो गंडौ मे मोदकाश

ग॰
क॰
१

नः हेमाननो मुखं पातु चाधरौ पातु वरिंद
मः दन्तान्मे एकदन्तोऽव्यात्कण्ठं डोऽवता
द्रसाम् गाङ्गेयो मे गलं पातु स्कन्दौ सिंहा
सनोऽवतु विघ्नान्तको भुजौ पातु स्कन्दौ
सिंहासनोऽवतु विघ्नान्तको[illegible] हस्तौ मू
षकवाहनः उरो ममावतान्नित्यं देवस्त्रि
पुरघातनः हृदयं मे कुमारोऽव्याज्जयन्तः
पार्श्वयुग्मकम् प्रद्युम्नो मेऽवतात्पृष्ठं ना
भिं शंकरनन्दनः कटिं नन्दिगणः पातु शि
श्नं वीरेश्वरोऽवतु मेढ्रं मेऽवतु सौभाग्यो
भृङ्गिरीटी च गुह्यकम् विराटकोऽवता
दूरू जानू मे पुष्पदन्तकः विघ्नकर्मावता
ज्जङ्घे गुल्फौ वसुगणोऽवतु पादौ चिन्तग
णः पातु पादाधो लोहितोऽवतु पादपृ
ष्ठं नूपुरोऽव्यान्नूपुरान्तोऽवतु र्भिम विचा
रो जठरं पातु भूतानि चोग्ररूपकः शि
रसः पादपर्यन्तं वपुः सप्तगणोऽवतु पा
दादिमूर्धपर्यन्तं वपुः पातु विनतकः

विस्मारि... तघस्थानं गणेशंस्तु सदाव
तु पूर्वं मां ह्रीं करालोऽव्यादाग्नेये विकरा
लकः दक्षिणे पातु संहारो नैरृते रुरु
भैरवः पश्चिमे मां महाकालो वायौ का
लाग्निभैरवः उत्तरे मां सितास्योऽव्यादै
शान्यामसितात्मकः प्रभाते शतपत्रो
ऽव्यात्सहस्रारस्तु मध्यमे दंतमालादि
नांतेऽव्यात्त्रिशिपात्रं सदावतु कलशं
मां निशीथेऽव्यात्त्रिशंतोपरशुस्तथा
सर्वत्र सर्वदा पातु शंखयुग्मं च मद्गुरुः
ॐ ॐ राजकुले ह्रौं ह्रौं रणभये ह्रीं ह्रीं कु
हूते वना क्लीं श्रीं शत्रुगृहे शौं जल
भये क्लीं क्लीं वनांतेऽवतु ग्लां ग्लूं ग्लैं
ग्लौं गुं सत्वभीतिषु महाव्याधेयार्तिषु
ग्लौं गं गौं नित्यं यक्षपिशाचभूतफणि
षु ग्लौं गं गणेशोऽवतु इतीदं कवचं गु
ह्यं सर्वतंत्रेषु गोपितम् वज्रपंजरना
मेदं गणेशस्य महात्मनः अंगभूतं म

त्तमं परं सर्वाचारैकसाधनम् विना तेन
न सिद्धिः स्यात्पूजनस्य जपस्य च तस्मा
त्कवचं श्रुणुं पठेद्धारयेत्सदा तस्य
सिद्धिर्महादेवि करस्था पारलौकिकी
यं यं कामयते कामं तं तं प्राप्नोति पाठतः
अर्धरात्रे पठेन्नित्यं सर्वाभीष्टफलं लभे
त् इति गुह्यतमं कवचं महागणपतेः प्रिय
म् सर्वसिद्धिमयं गुह्यं गोपयेत्परमेश्व
रि ॥ इति श्रीदेवीरहस्ये तन्त्रे महाग
णपतिकवचं सम्पूर्णं समाप्तम् ॥

ॐ श्रीगणेशाय नमः ॐ श्रीगणपतये
नमः ॐ श्रीगणेशाय विघ्नेशाय भवाद्भुत
केतवे नमो निर्विघ्नमारब्धकार्यनिर्वा
हहेतवे ओंकारमाद्यं प्रवदन्ति सन्तो वा
चः श्रुतीनामपि यं गृणन्ति गजाननं
देवगणानताङ्घ्रिं भजेहमर्धेन्दुकृताव
तंसम् पादारविन्दार्चनतत्पराणां संसा
रदावानलभङ्गदक्षम् निरन्तरं निर्गत
दानतोयैस्तं नौमि विघ्नेश्वरमम्बुजाभम्
कृतांगरागं नवकुङ्कुमेन मत्तालिमा
लां मदपंकलग्नाम् निवारयन्तं निजक
र्णतालैः को विस्मरेत्पुत्रमनङ्गशत्रोः
शंभोर्जटाजूटनिवासिगङ्गाजलं समा
दाय करांबुजेन लीलाभिराराच्छिवम
र्चयन्तं गजाननं भक्तियुता भजन्ति कु
मारमुक्तौ पुनरात्महेतोः पयोधरौ पर्व
तराजपुत्र्याः प्रक्षालयन्तं करशीकरे
ण पूर्णाननं नागमुखं भजामि त्वयास

ग.

स्तो
१

सप्तहृत्सगजास्यहृत्स्थले ये शीकराः पुष्कर
रंध्रमुक्ताः व्योमांगने ते विचरंति ताराः क
लात्मना मौक्तिकतुल्यभासः क्रीडारते वा
तिनि योगजास्यवेलामतिक्रामति वारि
पूरे कलावमानं प्रविविंशत्स्देवाः केला
सनाथस्तुतिभिः स्तुवंति नागाननेना
गत्कृतो नरीये क्रीडारते देवकुमारमुख्यैः
त्वयि त्वणं कालगतिं विहायमौ प्रापतुः
कंडुकतामि नेंद्र मदोलसत्संचमुखेरज
स्वमध्यापर्यंतमकलागमार्थान् देवीन्द
षीभक्तजनैकमित्रं हेरंभमकारुणमा
श्रयामि पादांबुजाभ्यामतिवामनाभ्यां
कृतार्थयंतं क्षपयाधरित्रीम् अकारणं
कारणमासवाचां तं नागवक्त्रं न जहाति
चेतः येनार्पितं सत्सवतीसुताय पुराण
मालिख्य विषाणकोसौ तं वंद्रमौलेस्त
नयं तपोभिरवाप्यमानं दत्तं न भजामि
पदं स्फुतीनामपदं स्तुतीनां लीलावता

रेण परमहंसमूर्तेः नागात्मको वा प्रकृतात्म
को वेत्यभेद्यमाद्यं भज विघ्नराजम् पाशां
कुशाभयवरदंत्वभीष्टकरैर्दधानंकरंध्र·
मुक्तैः मुक्ताफलाभैः पृथुशीकरौघैः
सिंचंतमंगं शिवयोर्भजामि अनेकमे
कं गजमेकदंतं चैतन्यरूपं जगदादिबी।
जम् ब्रह्मेति यं वेदविदो वदंति तं शंभुसू
नुं शरणं व्रजामि स्वांकस्थितायां निज
वल्लभायां मुखांबुजालोकनलोलनेत्र
म् स्मेराननाब्जं मदवैभवेन मत्तं भजे वि
घ्नविमोहनेनतम् ये पूर्वमाराध्य गजा
ननं त्वां सर्वाणि शास्त्राणि पठंति तेषाम्
त्वत्तो न चान्यत्प्रतिपाद्यमेतैस्तदस्मि न·
स्मसमस्तकल्पम् हिरण्यगर्भजगदी
शितारंकविंपुराणंरविमंडलस्थम् ग
जाननं यं प्रवदंति संतस्तं कालयोगैस्त·
मदंप्रपद्ये वेदांतगीतं पुरुषं भजेहमा
त्मानमानंदघनं हृदिस्थम् गजाननं य

स्नहस्नाननानंविघ्नांधकारंविलयंप्रया
ति शंभोःसमालोक्यजटाकलापेशशांग
कखंडनिजपुष्करेण स्वभग्नदंतप्र
विविंसमोग्यादाकष्टकामःशिवमा
तनोतु विघ्नार्गलामांविनिपातनार्थं
यन्नारिकेलैःकदलीफलाभैः प्रवाद
यंतमदवारणास्यप्रापुर्नरोभीष्टमहंभ॰
जेतम् यज्ञैरनेकैर्बहुभिस्तपोभिरारा
ध्यमाद्यंगजराजवक्त्रम् स्तवमानयोये
विधिनास्तवंतितिसर्वलक्ष्मीनिलयोभ
वंति ॥ इतिश्रीशारदातिलकेगण
पतिस्तोत्रंसमाप्तम् ॥ शुभम्

शि॰
क॰
१

ॐ श्रीगणेशाय नमः ॐ श्रीगुरवे शिवा-
यो नमः ॐ नमः शिवाय ॐ नमस्कृत्य म
हादेवं विश्वव्यापिनमीश्वरम् वक्ष्ये शिव
मयं वर्म सर्वरक्षाकरं नृणाम् शुचौ देशे
समासीनो यथावत्कल्पितासनः जिते-
न्द्रियो जितप्राणः चिंतयेच्छिवमव्ययम्
हृत्पुंडरीकांतरसन्निविष्टं स्वतेजसा व्याप्त
नभोवकाशम् जितेंद्रियं सूक्ष्ममनंत
माद्यं ध्यायेत्परानंदमयं महेशम् ध्या
नावधूताखिलकर्मबंधश्चिरं चिदानंद
निमग्नचेताः षडक्षरन्याससमाहिता
त्मा शैवेन कुर्यात्कवचेन रक्षाम् मां पा
तु देवोखिलदेवतात्मा संसारकूपे पति
तं गभीरे यन्नाम दिव्यं वरमंत्रमूलं धुनो
तु मे सर्वमघं हृदिस्थम् सर्वत्र मां रक्षतु
विश्वमूर्तिर्ज्योतिर्मयानंदमयश्चिदात्मा
अणोरणीयानुरुशक्तिरेकः स ईश्वरः
पातु भयादशेषात् यो भूस्वरूपेण बि

भक्तिविश्वंपायात्सभूमोगिरिशोष्टमूर्तिः
योयांस्वरूपेणजनान्करोतिसंजीवनेसो
वतुमेजलेभ्यः कल्पावसानेभुवनानिद
ग्ध्वासर्वाणियोनृत्यतिभूरिलीलः सका
लरुद्रोवतुमांदवाग्नेर्भयादिभीतेरखि
लाश्चपायात् प्रदीप्तविद्युत्कनकावभा
सः सदावराभीतिकुठारहस्तः चतुर्मुख
स्तत्पुरुषः त्रिनेत्रःप्राच्यांस्थितोरक्षतुमा
मजस्रम् कुठारवेदांकुशपाशशूलढ
क्काक्षमालादिगणान्दधानः चतु
र्मुखोनीलरुचिस्त्रिनेत्रःपायादघोरोदि
शिदक्षिणस्याम् कुन्देन्दुशंखस्फटिका
वदातोवेदाक्षमालावलयाभयांकः दि
शश्चतुर्वक्त्ररुप्रभावःसद्योथजातोव
तुमांप्रतीच्याम् वराक्षमालाभयटङ्क
हस्तःसरोजकिंजल्कसमानवर्णः त्रि
लोचनश्चारुचतुर्मुखोमांपायादुदीच्यां
दिशिवामदेवः वराभयेष्टांकुशपाशशा

शि॰
क॰
२
2

ॐ कपालडुक्ककात्त्रिशूलपाणिः सितद्यु
तिः पंचमुखोवतान्मामीशानमूर्धपरमप्र
काशः मूर्धानमव्यान्ममचंद्रमौलिः भालं
ममाव्याद्धरनेत्रः नेत्रे ममाव्याद्भगनेत्रहा
रीनासांसदारक्षतुविश्वनाथः पायाच्छ्रु
तिंमेश्रुतगीतिकीर्तिः कपोलमव्यात्सत
तंकपाली वक्त्रंसदारक्षतुपंचवक्त्रोजि
ह्वांसदारक्षतुवेदजिह्वः कंठंगिरीशो
वतुनीलकंठः पाणिद्वयंपातुपिनाकपा
णिः दोर्मूलमव्यान्ममधर्मबाहुर्वक्षस्थ
लंदक्षमखांतकोव्यात् ममोदरंपातुगि
रीन्द्रधन्वामध्यंममाव्यान्मदनांतकारी
हेरंबतातोममपातुनाभिंपायात्कटिंधू
र्जटिरीश्वरोमे ऊरुद्वयंपातुकुबेरमि
त्रोजानुद्वयंव्याज्जगदीश्वरोमे जंघायु
गंपुंगवकेतुरव्यात्पादौममाव्यात्सुरवंद्य
पादः महेश्वरःपातुदिनादियामेमांमध्य
यामेवतुवामदेवः त्र्यंबकःपातुतृती

ययामे वृषभध्वजः पातु दिनान्त्ययामे पाया
द्दिनान्ते शशिशेखरो मां गंगाधरो रक्ष
तु मां निशीथे गौरीपतिः पातु निशाव
साने मृत्युंजयो रक्षतु मां प्रभाते अन्त
स्थितं रक्षतु शंकरो मां स्थाणुः सदा पा
तु बहिःस्थितं माम् तदन्तरे पातु पतिः
पशूनां सदाशिवो रक्षतु मां समन्तात्
तिष्ठन्तमव्याद्भुवनैकनाथः पायाद्व्रज
न्तं प्रमथाधिनाथः वेदान्तवेद्योऽवतु मां
निषण्णं मामव्ययः पातु शिवः शयान
म् मार्गेषु मां रक्षतु नीलकंठः शैला
दिदुर्गेषु पुरत्रयारिः अरण्यवासादि
महाप्रवासे पायान्मृगव्याध उदारश
क्तिः कल्पान्तकालोग्रकटुप्रकोपस्फु
टाट्टहासोच्चलिताण्डकोशः घोरारिसे
नार्णवदुर्निवारमहाभयाद्रक्षतु वीर
भद्रः पत्त्यश्वमातंगघटावरूथिनां स
हस्रलक्षायुतकोटिभीषणम् अ

क्षौहिणीनांशतमाततायिनांछिंद्यान्
मृडोघोरकुठारधारया निहंतुदस्यून्प्र
लयानलार्चिर्ज्वलत्त्रिशूलंत्रिपुरांतक
स्य शार्दूलसिंहर्क्षमृगादिहिंस्रान्संत्रा
सयत्वीशधनुःपिनाकः दुःस्वप्नदुःश
कुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुः
सहदुर्यशांसि उत्पाततापविषभीति
मसद्ग्रहार्त्तिंव्याधींश्चनाशयतुमेजग
तामधीशः ॐनमोभगवतेसदाशि
वायसकलतत्त्वात्मकाय सकलत
त्त्वविहाराय सकललोकैककर्त्रे स
कललोकैकभर्त्रे सकलनिगम
गुह्याय सकललोकैकवरप्रदाय
सकलदुरितार्त्तिभंजनाय सकल
जगदभयंकराय शशांकशेख
राय शाश्वतनिजावासाय निरा
भासाय निष्प्रपंचाय निर्द्वंद्वाय निः
संगाय निर्गुणाय निरुपमविभ

गाय निराधाराय निष्प्रपञ्चपरिपूर्णचि
दानंददानंतानंदपरमप्रकाशाय तेजोम
याय जयजयमहारुद्र भवावतार महा
भैरव कपालभैरव कल्पांतभैरव क
पालमालाधर खट्वांगखड्गचर्मपाशां
कुशडमरुत्रिशूलचापबाणासिगदाश
क्तिभिंडिपालतोमर मुद्गर प्रास परिघ
भुशुंडि शतघ्नि चक्रायुध भीषणकर
सहस्रमुख दंष्ट्राकराल विकटाट्टहास
विस्फारित ब्रह्मांडमंडल नागेंद्रकुंड
ल मृसंजयांत कांतक कामांतक
त्रिपुरांतक विरूपाक्ष विश्वरूप विश्वे
श्वर वृषभवाहन विषभूषण षड्भू
षण विश्वतोमुख सर्वतोमुख सर्वतो
रक्षमांज्वलज्वल त्रिशूलेनविदारयवि
दारय कुठारेणभिंदिभिंधि खट्वांगेन
विपोथयविपोथय मुसलेननिष्पोथ
यनिष्पोथय रक्षांसिभीतयभीतय

भूतानि विद्रावय विद्रावय कूष्माण्डवेता
लमारीगणब्रह्मराक्षसगणान्संत्रासय
संत्रासय ममाभयं कुरु कुरु वित्रस्तं
मामाश्वासयाश्वासय दुःखांतरं मामा
नंदयनंदय क्षुधार्तिं निवारय निवारय
नरकभयान्मामुद्धारयोद्धारय शिवक
वचेन मामाच्छादयाच्छादय ॐ सदाशि
वाय नमस्ते नमस्ते ऋषभ उवाच इति
दं कवचं शैवं परमं व्याहृतं मया सर्व
बाधाप्रशमनं रहस्यं सर्वदेहिनाम् यः
सदा धारयेन्मर्त्यः शैवं कवचमुत्तमम्
न तस्य जायते क्वापि भयं शंभोरनुग्रहा
त् क्षीणायुः प्राप्तमृत्युर्वा महारोगहतो
पि वा देहान्ते मुक्तिमाप्नोति शिववर्मा
नुभावतः सद्यः स्वास्थ्यमवाप्नोति दीर्घ
मायुश्च विंदति सर्वदारिद्र्यशमनं सर्वमं
गल्यवर्धनम् यो धत्ते कवचं शैवं स देवैर
पि पूज्यते महापातकसंघातैः मुच्यते चो

पपातकैः देहांतेमुक्तिमाप्नोतिशिववर्मा
नुभावतः इतिश्रीब्रह्मप्रोक्तंशिवकवचं
समाप्तम् ॥
ॐयत्पापोग्निमरुद्व्योममखविशेंदुर्कमूर्त-
ये सर्वभूतांतरस्थायशंकरायनमोन-
मः श्रुत्यंतकृतवासायश्रुतयेश्रुततत्त्व
मने अतींद्रियायमहसेशाश्वतायनमो
नमः स्थूलसूक्ष्मविभागाभ्यामादिदे
शायशंभवे भवायभवभूतायदुःखौ-
घहर्त्रेनमोनमः तर्कमार्गाभिभूतायत
पसांफलदायिने चतुर्वर्गविदग्धायस
र्वज्ञायनमोनमः आदिमध्यांतशून्या
यनिरस्ताशेषभीतये योगिध्येयाय-
महतेनिर्गुणायनमोनमः विश्वात्म-
नेविचिंत्यायविलसच्चंद्रमौलये कंद
र्पदर्पनाशायकालहर्त्रेनमोनमः वि-
श्वाशनायविहरद्भूषसंदष्टपेशुषे स
रिद्धामसमावृद्धकंदर्पायनमोनमः

शि॰
क॰
५
5

शुद्धाय शुद्धभावाय शुद्धानामन्तरात्मने
पुरान्तकाय पूर्णाय पुण्यनाम्ने नमो नमः
तुष्टाय निजभक्तानां भुक्तिमुक्तिप्रदायि
ने निर्वासमेनिवासाय विश्वाशाम्ने न-
मो नमः त्रिमूर्तिमूलभूताय त्रिनेत्राया
दिशांभवे त्रियाम्नायामरूपाय जन्म-
घ्नाय नमो नमः देवासुरशिरोरत्नकि
रणारुणितांघ्रये कान्ताय निजकान्ता
येदत्तार्धाय नमो नमः स्तोत्रेणानेन पू
जायां प्रीणाये जगतः पतिम् भुक्तिमु
क्तिप्रदं भक्त्या सर्वज्ञं परमेश्वरम् ॥
इति श्रीतन्त्रसारे शिवस्तोत्रं समाप्तम्

स्व. छ. १

ॐ श्रीगणेशाय नमः ॐ श्रीगुरवे शिवाय्यै
नमः ॐ चन्द्रापीडं त्रिनेत्रं विकसितमहसं
पंचवक्त्रं कुठारम् दोर्भिर्बिभ्राणमस्त्रकु
शकुलिशयुतं दंडखट्वांगखेटान् वीणा
पाशांकुशाभयवरडमरुं मुद्गरं स्फूलद्य
टे स्वच्छे स्वच्छन्दनाथं निजनिभशिवया
श्लिष्टमीडे मृडस्यम् १ ॐ यज्ज्ञात्वा तीतमा
यं त्रिदशमुनिनतं भाति यत्तत्स्वरूपम् उ
ध्येतं योनिलक्ष्यं शशधरमुकुटं निष्कल
निष्कलंकम् शशांकार्कत्रिनेत्रं स्फटिक
तटसितं हाटकाभंपराभम् सौमीशानं
स्वयं तत्परशिव इति चिद्रूपमूर्ध्वं मुखाब्ज
म् २ यन्नमस्वर्णवर्णं नलिनदलदृशं भा
तिं वन्धूककान्तम् भास्वत्सोमावतंसं भुज
गग्रथितजटाजूटमैष्वर्यदीनम् ब्रह्मोपेन्द्रा
दिदैवैः प्रणमितचरणं स्तोमितमरूपा
त्मम् पूर्वं शंभोर्मुखं तत्सुरनरमयदंत्का
लकालंकरालम् ३ घोरं घोरांयकारं

ज्वलनिकरनिभं व्रिड्रितं द्वारिर्मुण्डम् माले·
न्दूनलार्चिर्विकृतरदनहग्भिन्नकृत्स्ना
यकारम् पिंगाक्षं भोगिभोगस्फुटविक
टजटं रुद्रमुग्राट्टहासम् तं वंदे दक्षिणा
स्यं स्मरकलिमथनं मन्मथारेरघोरम् ४
उद्यत्सूर्यप्रकाशं सरसिजनयनं चारुबिं
बाधरोष्ठम् भक्तस्यानतिसौम्यं सकल
सुभगतासिंदुसिंदूर्धभूषम् वामे वामे·
तरेणाश्रितममरगणैरुत्तरं वंद्यमाढ्य
म् योगींद्रैर्वामदेवं विहसितवदनं स्फु·
ल्लितेनोनिरमीडे ५ गंगात्वंगत्तरंगाशव
लितगगनं शांवनागांगगौरम् चूडाग्रो
रंच्छखंडस्फुरितशितिमलं द्योतितानंग
भंगम् प्रालेयाभं प्रसन्नं त्रिभुवनविन
तं भस्मनाभासितांगम् सद्योजातं भजे
तन्मुखकमलमलं पश्चिमं शंकरस्य ६
विभ्राजज्ज्योतिरात्नस्वकिरणपटलैर्दीपि
ताललोकम् नागेंद्रैर्योपवीतं त्रयदनु

स्व·
छं २
2

गणैःपूजितंपादपंकजैः विश्वकर्त्तारमेकं स्व
यंभुक्तिजननवरदं सर्वसंहारकर्त्तारंदेवका
लाग्निरुद्रप्ररहरमयंपूजितंदेवक्रमीश
म् ७ व्योमतःस्वच्छंदपर्यन्तरश्मिविद्येप
देमंदरेयोहिमाद्रौ कैलासेयक्षकालि
क्षितिजलदहनाद्यष्टमूर्तिर्महेशः ध्या
त्वाविंगोचराजत्रिभुवनगोयोवि
भुःशक्तियुक्तैःकलशैःसर्वैश्वरायस्वच्छंदय
गगनध्यायध्यामेनमामि ८ एतत्स्तोत्रं
प्रकाशाद्गुरुचरणाम्भोजलब्धप्र
सादः कौलेशोदारवंशोद्भवइहजन्तुषि
प्राप्तसर्वैकसिद्धिः श्रीगोविंदोमहेश
स्तवमवनरतंसंस्थयाह्वानभक्त्या यो
पीतेभक्तियुक्ताःसमभजतिसुकृती सर्व
लेश्वर्यमिष्टम् ॥ इतिश्रीस्वच्छंद
महेश्वराष्टकंसमाप्तम् संपूर्णम्

ॐ श्रीगणेशाय नमः अथ सूक्ष्मपूजाविधिः
आदावासनशोधनं ततः संविस्पूजा ततो
दिग्बंधनं गणपतिगुरुदेवतावंदनं गं
धादिशोधनं श्रीगुरुपादुकान्यासः
श्रीगुरुपादुकापूजा गंधादिमुद्राः आ
त्मरक्षा प्राणायामत्रयं भूतशुद्धिः प्रा
णप्रतिष्ठा अंतर्मातृकान्यासः बहिर्मा
तृकान्यासः योगपीठन्यासः अंतर्यजनं
प्राणायामादिः स्वदेहे गंधादिपूजा ॐ
अद्येत्यादि अमुकमासे अमुकपक्षे
अमुकतिथौ अमुकगोत्रः अमुकशा
र्मा श्रीपरदेवीप्रीत्यर्थं अमुककामना
सिद्ध्यर्थं धूपदीपसंकल्पात्सिद्धिरस्तु
सामान्यार्घ्यस्थापनं कलशस्थापनं
श्रीपात्रस्थापनं शिरसि हृदि गुरुदेवी
तर्पणं योगपीठपूजा श्रीचक्रपूजा
श्रीदेव्या आवाहनं आसनं पाद्यं अर्घ्यं
आचमनीयं मधुपर्कं पुनराचमनीयं

सू पू ।

स्नानीयम् वस्त्रं भूषणं गंध पुष्प धूप
दीप नैवेद्य तांबूलादि मुद्रादर्शनम् षो
डशाभिस्सार्धेन गुरुपंक्तिपूजा नवावर
णपूजा मुद्राः दिक्पालपूजा पुनर्गीथा
दिपूजा नित्यहोमः वटुकादिबलिपंच
कं बलिप्रदानं कुमारीपूजनं जपवि
धिः क्षमाश्लोकाः पूजासमर्पणं विस
र्जनम् मातंगीपूजनं श्रीपात्रसमर्पणं
चित्तत्वशोधनं पात्रवंदनं उच्छिष्टभैरव
पूजा शांतिस्तोत्रं वीरवंदनं अच्छिद्राव
धारणम् प्राणायामत्रयं ऋष्यादिन्या
सः करषडंगन्यासौ इतिपूजाविधिःसू
र्यप्रकारः ॥ अथपुरश्चरणादिविध
येजपबाकल्यात्सूर्यमार्चाप्रकारः ॥

ॐ नमो धर्मनिधानाय नमः स्वकृतसा
क्षिणे नमः प्रत्यक्षदेवाय भास्कराय न
मो नमः इतिसूर्यमंत्रः यत्रास्ति मानान

पितानंदपुर्यां त्रापि नोयत्र स्नानं ज्ञानस्थ
नस्नायनेयत्र दिने न रात्रिस्तत्रापि दीपं
प्रागणं प्रपद्ये इति श्रद्धनाहस्ते निधि
ाय ग्रथेमानितिं संकल्पं पठेत् ॥

प्रथममासांनपुष्पादिवहिर्मातृको
मासांतं कार्यं ततो योगपीठन्यासः
ततोन्तर्यजनं ततः स्वदेहे तिलकादिकं
स्वात्मने शिवशक्तिस्वरूपाय गंधो न-
मः धूपं नमः ततः स्वप्रकाशो महा
दीपः इति दीपेपूजा वनस्पतिरसोत्प
न्नो इति धूपे नमो धर्मनिधानाय
इति नैवेद्ये मत्राक्षितमालान इति पठित्वा
संकल्प्य सामान्यार्घ्यं श्रीपात्रसंस्थाप
योगपीठपूजां गंधादिपूजां श्रीचक्रेन
वमावरणार्चां कृत्वा वटुकादिबलिं द-
त्वा जपं कुर्यात् ॐ अस्य कुमारीसहवा-
सिनीं वादेवतातुष्ट्यादेवीप्रीतये पूजये

९
२

2

त. तद्यथा सर्वलक्षणसंपूर्णां स्वस्थानां
स्वपरिष्कृतां कन्यां स्ववासिनीं समा
नीय: तस्याः पादौ प्रक्षाल्य शुक्लवस्त्रे
ण मार्जयित्वा तां पूजापीठे समुपवेश्य
तस्याः पादौ पादपीठोपरि प्रक्षाल्य स्व
पादपीठे स्थिरासने संस्थाप्य तां योगपी
ठे पूजांविधाय स्वास्तिकासनोपविष्टा
यां तस्यां ॐ ऐं अक्षरमयी लक्ष्मीमा।
तृकारूपधारिणीम् नवदुर्गात्मिकां
साक्षात्कन्यामावाहयाम्यहं इमां वा
ल ऐं क्लीं सौः बालाविद्यामुद्धार्य कु
मारीश्रीपादुकां ९ इति तस्यां देवीः
संपूज्य बालाविद्यैवं गंधादिदीपां
तैरुपचारैः संपूज्य स्ववासिनीपदेन
स्ववासिनीं श्रीं इति संपूज्य ततः श्रा
रवद्धिंविजमभूया वाहनविद्यया च
तस्यां मूले नागाहनादि परमीकरणं
तेषागवहियाय मूलदेवीपूजितां प्रा

पञ्चहोमतर्पणादिभोजनान्तानुपचारान्
पच्चर्घ्य आचमनं कृत्वा ताम्बूलं वस्त्रा-
दिदक्षिणां च समर्प्य विसर्जयेदिति कुमा-
रीपूजनम् श्रीदेव्यै नमः

नागराजावपि स्तुः शतेन ९. जितवादवादिविजयार्थं ६२

ना

८	४४	४७	१
४६	२	७	४५
३	४९	४२	६
४३	५	४	४८

जि

८	२५	२८	१
२७	२	७	२६
३	३०	२३	६
२४	५	४	२९

भु

भुवनं वश्यं पञ्चषष्टि नः

८	२६	२९	१
२८	२	७	२७
३	३१	२४	६
२५	५	४	३०

धान्यं चतुर्विंशतेः

धा

८	६	९	१
८	२	७	७
३	११	४	६
५	५	४	१०

कांक्षिकार्यां लिखेन्म

क

३४	१४	४२
३८	३०	२२
१८	४६	२६

परबलमाशु यातिनाश

प

४२	७	५६
४९	३५	२१
१४	६३	२८

मनोभीष्टार्थम्

६	१	८
७	५	३
२	९	४

ईतिनाशनार्थम्

८	८	११	१
१०	२	७	९
३	१३	६	६
७	५	४	१२

नारीगर्भमुक्त्यर्थम्

८	१	६
३	५	७
४	९	२

रक्तस्रावभयवारणार्थं

८	१२	१५	१
१४	२	७	१३
३	१७	१०	६
११	५	४	१६

स्तिनीमवार्थम्

८	२१	२४	१
२३	२	७	२२
३	२६	१९	६
२०	५	४	२५

वंध्यायाः सुतजनिता ५..

८	२४४	२४७	१
२४६	२	७	२४५
३	२४९	२४२	६
२४३	५	४	२४८

द्वात्रिंशत्तायात्रिणः

८	१०	१३	१
१२	२	७	११
३	१५	८	६
९	५	४	१४

बहुशस्त्रास्त्ररागदनाशनं

८	२९४	२९७	१
२९६	२	७	२९५
३	२९९	२९२	६
२९३	५	४	२९८

दंपत्योर्वशीजननम् ७॥

(ह्रूं)

८	३४४	३४७	१
३४६	२	७	३४५
३	३४९	३४२	६
३४३	५	४	३४८

शरणपाद्दोनमथम् ८॥

(स्त्रूरणा)

८	३५४	३५७	१
३५६	१	७	३५५
३	३५९	३५२	६
३५३	५	४	३५८

अथ स्त्रीमकरणाह्वती

(अस्त्र)

८	४४४	४४७	१
४४६	२	७	४४५
३	४४९	४४२	६
४४३	५	४	४४८

स्वमुखेधारणेन विश्ववश्यं

(स)

८	७७	८०	१
७९	२	७	७८
३	८२	७५	६
७६	५	४	८१

ब्रह्मादिविद्याप्राप्त्यर्थम्

(ऊ)

८	४६९	४७२	१
४७१	२	७	४७०
३	४७४	४६७	६
४६८	५	४	४७३

शत्रोर्नाशार्थम्

(शत्र)

२४	३	२७	८
५	३०	२	२५
४	२३	७	२८
२९	६	२६	१

४ नमायकेः न्वपवश्चपता॰ वंदीप्रमोदो नमोरहैः

नमा

५

८	५४४	५४७	१
५४६	२	७	५४५
३	५४९	५४२	६
५४३	५	४	५४८

वं

८	५५४	५५७	१
५५६	२	७	५५५
३	५५९	५५२	६
५५३	५	४	५५८

स्थाहि स्थवपूर्णमनोभीहृता डाकिनीभयदारम

स्था

८	४५४	४५७	१
४५६	२	७	४५५
३	४५९	४५२	६
४५३	५	४	४५८

डा

७	२४	१	२६
२	२५	८	२३
२८	३	२२	५
२१	६	२७	४

ॐ श्रीगुरवे शिवाय नमः ॐ श्रीदेव्यै न
मः ॐ श्रीगणपतये नमः ॐ अथ पुर
श्चरणविधिः तत्रादौ भूमेः परिग्रहं कृ
त्वा पुरश्चरणप्राक्तनीयदिवसे शौ
चादिकं विधाय विदितवस्तुर्दिक्को
णं कोणाष्ठं वा देवं चतुरस्रमाहारा
दिविहारार्थं परिकल्प्य तत्रैव कूर्मचा
क्रानुशरणं मंडपं विधाय एकभक्तं कु
र्यात् ततः परदिने स्नानादिकं विधाय
शुद्धः सन् अस्य स्योर्वरस्थानामस्म
तमस्य वितस्तिमात्रादशकीलान्विदि
कायाम् येचात्र विघ्नकर्तारो भुवि दिव्य
न्तरिक्षगाः विघ्नभूतास्तु ये चान्ये मम मं
त्रस्य सिद्धिषु मयैतत्कीलितं क्षेत्रं या
ति सम्यग्विहरतः अपसर्पन्तु ते सर्वे निर्वि
घ्ना सिद्धिरस्तु मे इत्यनेन ॐ अस्त्राय फ
ट् इति मंत्रेणाष्टोत्तरशताभिमंत्रिता
न् दश दिक्षु निखनेत् ॐ नमः सुद

१. वि. १

शीनास्त्राय फडितिमंत्रेणअंह्रंसंपूज्य इं-
द्रादिलोकपालान् भूर्भुवःस्वरिमेतेलो
कपाला आगच्छन्तु इत्यावाह्य पंचोपचा
रैः पूजयेत् ततोमध्यस्थाने क्षेत्रपालंवा
स्तोशंसंपूज्य सर्वविघ्ननिरावरणार्थं
गणपतिंप्रपूजयेत् यथा ॐअद्येत्यादि
अमुकगोत्रोअमुकदेवशर्मामत्कर्तव्या
मुकपुरश्चरणकर्मणिविघ्ननिरासार्थं
गणेशप्रपूजनमहंकरिष्ये इतिसंक
ल्प्य वेदिमध्येपंचोपचारैःपूजयेत् त
तः येरौद्रारौद्रकर्माणोरौद्रस्थाननि-
वासिनः मातरोप्युग्ररूपाश्चगणाधि-
पतयश्चये विघ्नभूताश्चयेचान्येदिवि
दिक्षुसमाश्रिताः सर्वेतेप्रीतमनसः
प्रीतागृह्णन्त्विमंबलिम् इत्यनेनाष्ट-
दिक्षुभूतेभ्योबलिंदद्यात् ततोगायत्रीं
प्रथमंज्ञाताज्ञातपापक्षयार्थंजपेत्
यथा अद्येत्यादिअमुकगोत्रःश्रीअमु

कदेवशर्मा ज्ञाताज्ञातपापक्षयकामो
ऽष्टोत्तरसहस्रं सावित्रीजपमहं करिष्ये त
त उपवासं हविष्यं वा कुर्यात् ततः परेद्यु
र्ते उषसि स्नानादिकं विधाय स्वस्तिवा
चनपूर्वं संकल्पं कुर्यात् ॐ अद्येत्यादि।
अमुकगोत्रः श्री अमुकदेवशर्मा अमु
कदेवतायाः अमुकमंत्रसिद्धिप्रतिबं
धकपापदुरितक्षयपूर्वकम् तन्मंत्र
सिद्धिकामोऽद्यारभ्य यावत्कालेन सिद्धिः स्या
त् तावत्कालं त्रिंशद्दिवसेषु पंचत्रिंश
द्दिवसेषु वा चत्वारिंशत् पंचाशत् वा
षष्टिदिवसेषु वा अमुकमंत्रस्य यथासं
ख्यं जपं तद्दशांशहोमं तद्दशांशतर्पण
तद्दशांशाभिषेक तद्दशांशब्राह्मण
भोजनरूपपुरश्चरणं श्रीविद्यामंत्रसि
द्धिप्राप्त्यर्थं सर्वकामनासिद्ध्यर्थं महं क
रिष्ये इति संकल्प्य भूतशुद्धिप्राणाया
मं कृत्वा स्वस्वगुरुं बद्ध्वा स्वस्वपद्धत्युक्त

क्रमेण देवतां संस्थाप्य दीपं प्रज्वालिते देव-
तां हृदये कृत्वा प्रातःकालमारभ्य मध्या-
दिनं यावज्जपं कुर्यात् ततो होमः ततस्त-
र्पणम् कुलार्णवे तर्पणं ततः कुर्यात्
तोयैर्दुग्धमिश्रितैः इति वचनात् त-
तो मार्जनं यथा नमः मूलमुच्चार्य अमुक-
देवतां तर्पयामि नमः इति कुम्भमुद्रया।
स्वमूर्ध्नि समभिषिंचेत् ततो ब्राह्मणभो-
जनम् ततो दक्षिणां संकल्प्य अद्य कृ-
तैतदमुकदेवताया अमुकमन्त्रस्य पुर-
श्चरणकर्मणः संपूर्णसर्वाङ्गतार्थम् द-
क्षिणामिमां कांचनमिदं यथा नामगो-
त्रायशर्मवेदभ्यं दशब्राह्मणेभ्यश्चेमां द-
क्षिणामहं संप्रददे ततोऽच्छिद्रावधारणं
यत्तच्छिद्रं तपच्छिद्रं यच्छिद्रं पूजने मम
तत्सर्वमच्छिद्रमस्तु भास्करस्य प्रसादत
अनेन श्रीमन्त्रजापेन लब्धं संसिद्धिजपत
दशांशहोम दशांशतर्पण दशांशाभि

भिषेकदशांशब्राह्मणभोजनान्तं पंचां-
गपुरश्चरणकर्मणा सर्वविघ्ननिवार-
णार्थं श्रीमहाराजराजेश्वरीभगवती
देवीसंतोषणार्थं यन्त्रान्यसरणी

लं क्षः	क ख ग			घ ङ	च छ ज झ ञ
श ष स ह	अ आ	इ ई	उ ऊ	ऋ ॠ	ट ठ ड ढ ण
	अं अः	ओ औ	ए ऐ	लृ ॡ	
य र ल व	प फ ब			भ म	त थ द ध न

पूर्वदिशि लं इंद्रश्रीपा पं वं वह्नौ रं
वह्निश्री टं यमश्री क्षं निर्ऋतिश्री वं
वरुणश्री यं वायुश्री सं कुवेरश्री हं ई-
शानश्री इं ईशानयोर्मध्ये अं ब्रह्म-
श्री निर्ऋतिवरुणयोर्मध्ये ह्रीं अनं-
तश्री पश्चादस्त्राणि पूजयेत् वज्रश्री
शक्तिश्री खड्गश्री पाशश्री ध्वजश्री
गदाश्री त्रिशूलश्री पद्मश्री चक्रश्री

पु॰
त्रि॰
३

पादुकां पू राज्यादिवांछितप्राप्तिपूर्वकं
श्रीविद्यामंत्रसिद्धिप्राप्त्यर्थं भक्तिमुक्ति
मुक्त्युपभोगार्थं परमानंदमयीपर
मामृतशक्तिः श्रीमहात्रिपुरसुंदरी श्री
राजराजेश्वरी सर्वमंत्रेश्वरी सर्वयंत्रे
श्वरी सर्वचक्रेश्वरी सर्वविद्येश्वरी स
र्वसिद्धीश्वरी सर्ववीरेश्वरी सर्वब्रह्मा
दिसुरेश्वरी सकलजगदुत्पत्तिमातृ
का श्रीकामेश्वर शिवसहिता सच
क्रासदेवता समुद्रासनसिद्धिः सांगा
सायुधा सासना सपरिवारा साव
रणा सर्वोपचारैः सुपूजिता सुज
प्ता सुहुता संतर्पिता प्रीयतां प्री
ता भवतात् ॥
इति त्रिपुरसुन्दरीपूजाविधिः संपूर्णः सि
द्धिदोस्तु साधकानाम् ॥

का॰
क॰
१

ॐ श्रीगणेशाय नमः ॐ नमो देव्यै भुक्तिमु
क्तिसद्युक्तिदायिन्यै श्रेयसे श्रीदेव्युवाच
ॐ भगवन् करुणाम्भोधे शास्त्राम्भोनिधि
पारगः दासी परमभक्तास्मि वरं दातुमि
हार्हसि श्रीभैरव उवाच ॐ कथय त्वम
हेशानि कांक्षितं वरमिच्छसि यत्किंचि
न्मनसीष्टं स्यात्तद्दातं तेह्मास्म्यहम् श्री
देव्युवाच कामेश्वरस्य देवेश कवचं देव
दुर्लभम् शीघ्रं मे दययाद्ब्रूहि यद्यहं प्रेय
सी तव श्रीभैरव उवाच शृणु देवि परमेशा
निकवचं मन्त्रगोपितम् महाकामेश्वर
स्यास्य न देयं परमाद्भुतम् यं धृत्वा यं प
ठित्वा च यं श्रुत्वा कवचोत्तमम् त्रैलोक्या
धिपतिर्भूत्वा सुखाविनोऽस्मि महेश्वरि तदे
व वर्णयिष्यामि तव प्रीत्या वरानने रहस्यं
परं तत्त्वं न दातव्यं दुरात्मने अस्य श्रीका
मेश्वरकवचमन्त्रस्य श्रीदक्षिणामूर्तिः
ऋषिः पंक्तिश्छन्दः श्रीकामेश्वरो देवता

श्रींबीजं ह्रींशक्तिः क्लींकीलकं चतु
र्वर्गफलप्राप्त्यर्थे कवचपाठे विनियोगः
ॐउद्यद्ब्रह्मसमानदीप्तिममृतानंदैकदे
हं परम् चिद्रूपं भुवनैकसृष्टिप्रलयो
द्भूतैककरत्नाकरम् कोटीचंद्रगलत्सु
धाद्रुततनुं हारादिभूषोज्ज्वलम् शूलं
खड्गवरेतथाभयकरं कामेश्वरं भावये
इतिध्यानम् मनसापूजयेत् ऐंकं का
मेश्वरः पातु क्लींशिवो मे ललाटकम्
सौः मे कर्णौ च कामेशः तारं मे लोचन
द्वयम् श्रीं गं ॐ मे महाकालो ह्रीं ना।
सां चंद्रचूडकः ह्रं मे ओष्ठौ त्रिपुरेशः सं मे
दंतौ च भैरवः ह्लं मे जिह्वां पातु देवो म
हाकामेश्वरः परः सं मोहनं सदा पातु
निंसश्मशानभैरवः लं मे कंठं सदापा
तु महावटुकभैरवः यं मे स्कंधौ सदापा
तु महामृत्युंजयस्तथा क्रों मे भुजौ सदा
पातु श्रीदेवीत्रिपुरांतकः सं मे हृत्को।

का॰
क॰
२

2

त्रिलोकेशः हं नाभिं मा पातु सुंदरः हं वक्त्रः
पातु श्यामेशो मं अङ्गुलिं कृत्तिकाम्बरः ।
लं पार्श्वौ पातु मे बालावं नाभिं ब्रह्मभू
षकः रं वस्तिं पातु मे देवो यं पृष्ठं विश्वरू
पकः ऊं शिश्नं पातु विश्वेशः अमृतेश्वर
भैरवः यं मेढ्रं पातु मे रुद्रो रं गुह्यं गुह्यके
श्वरः लं कटिं पातु मे नित्यं शिवः परमका
रणः वं ऊरू त्रिपुरारिघ्नो लं जानू देवपा
लकः मं जंघे पातु महिमा यं गुल्फौ सूर्य
रूपकः श्रीं जठरं हरः पातु ह्रीं मनो ग्रह
सुंदरः ॐ बुद्धिं पातु मे रुद्रः सौः रसं दक्ष
जापतिः क्लीं रक्तं पातु मे देवः ऊर्ध्वं चवा
ऽस्थिरूपधृत् ऐं मांसं गुह्यकः पातु मेदः प
शुपतिस्तथा अस्थि मे गिरिजानाथो म
ज्जां मे नीलकंठकः शुक्रं भूतेश्वरः पातु
मूर्धानं शंकरोऽवतु पादौ श्रीसुंदरीशा
नो देवः कालान्तकः प्रभुः पादादिशिरः प
र्यन्तं अघोरः पातु सर्वदा शिरसः पादपर्य

नेसद्योजातो मम मावतु प्रौढरूपस्सदा पा
तुस्वाहा मे सकलं वपुः कामेश्वरः श्मशा
नेमान्मध्याह्ने कालभैरवः सायं पातु
कुलेशानः निशीथे निष्कलेश्वरः अर्ध
रात्रे वामदेवो निशांते मम महोदयः सर्व
दा सर्वतः पातु पं क्लीं सौः बीजरूपधृक्
पूर्वे मामसितांगो व्यात् दक्षिणे रुरुभैरवः
पश्चिमे पातु चंडेशो ह्युत्तरे क्रोधभैरवः
ऐशान्यां पातु चोन्मत्तः कपालेशस्तथा
ग्निके नैर्ऋत्यां भीषणः पातु वायव्यां संहार
कोवतु ऊर्ध्वं मे कालरुद्रश्च पाताले पर
मेश्वरः मध्ये सदाशिवः पातु त्रिकूटेशः
सदावतु। दशदिक्षु सदा पातु महाका।
मेश्वरोवतु विस्मारितं च यत्स्थानं यत्स्था
नं नाम वर्जितं तत्सर्वं पातु मे देवः त्रिपु
रापतिरीश्वरः गृहे शर्वस्सदा पातु वहिः
पायाद्वृषध्वजः पतिस्त्रिपुरसुंदर्याः पा
तु सर्वत्र सर्वदा रणे राजकुले दुर्गे दुर्भिः

का·
क·
३
3

द्वेशत्रुसंसदि द्यूतेमारीभयेराष्ट्रविप्लवे·
वादिनाकुले कामेश्वरस्सदापातुभयस्था
नेचसर्वदा इमेतत्कवचंगुह्यंत्रिषुलोके
षुदुर्लभम् मूलमंत्रमयंदिव्यंत्रैलोक्येसा
रमुत्तमम् अदातव्यमवक्तव्यंकवचंगुह्य
मीश्वरि अदृष्टव्यमश्रोतव्यंदीक्षाहीनाय
मंत्रिणे परदीक्षायशिष्याययुत्रायशठ·
जन्मने नदातव्यंनश्रोतव्यमिमंसाक्षात्सा·
मर्कीर्तनात् परंश्रीमहिमानंचप्राणेभ्यश्चा
प्यसत्तमम्: अदीक्षितोयदामंत्रीविद्यां
गृह्य:पठेदिदम् सदीक्षितइतिज्ञेयोमां·
त्रिक:साधकोत्तम: गुरुपूजांविधायाथ
विधिवत्तत्पठेत्तत: कवचंत्रिसंध्यंवापिया
वज्ज्ञानंचवात्मन: एतात्त्वज्ञार्थमावर्त्यत्रैलो
क्यविजयीभवेत् य:पठेन्ममनस्सांतस्त्वरात्रौ
ब्राह्मेमुहूर्तके पूजाकालेनिशीथेवातस्य
हस्तस्थसिद्धय: दुर्गमेवंधनेघोरेकांता
रेसागरेभये रणसंस्थतमोरूपंपवर्मकामे

स्मरस्मृत कांदितंमननसाधयघतनस्सामो।
तिसाधकः महाकविर्भवेन्मासमात्रसर्वसि
द्धीश्वरोभवेत् कुंकुमेनलिखित्वावैभूर्जे
त्वचिरवौदिने प्रातःकालेशुभर्दैवस्वा
णीस्थंधारयेद्यदि स्त्रीवोवायांदक्षिणेवा
हौकंठेवाधारयेद्बुधः यद्यदिष्टंभवेत्त
त्तत्साधकोलभतेचिरात् यद्गृहेवर्तते।
वर्मश्रीकामेश्वरदैवतम् विद्याकीर्तिर्ध
नारोग्यंलक्ष्मीर्वृद्धिर्नसंशयः विनावलिं
वंसरंक्षकवचंसाधकोत्तमैः चतुरंतः
स्तंतादाशनाशुभवन्तियोगिनी वलिंद
त्वापठेद्धर्मधारयेन्मूर्ध्निसाधकः पुत्र
वान्धनवांश्रीमान्नानाविद्यानिधिर्भवेत्
इहभोगान्समश्नातिपरत्रमुक्तिभाग्भवे
त् ब्रह्मास्त्रादीनिशस्त्राणितस्त्रास्पर्श
नात्ततः नाशमायांतिसर्वत्रकवचस्या
स्यधारणात् मृतवत्सावामवाहौकवच
स्यास्यधारणात् वह्वपत्याजीववत्साभ

भवत्येव न संशयः रणे धृत्वा चरेद्युद्धं हत्वा
शत्रून् जयं लभेत् जयं कृत्वा गृहं देवि सम्प्रा
प्नोति सुखी नरः महाभये महाघोरे म
हामारीभये तथा दुर्भिक्षे शत्रुसंग्रामे
पठेत्कवचमादरात् सर्वं तत्प्रशमं याति
कामेश्वरप्रसादतः कवचस्यास्य देवेशि
वर्णितुं नैव शक्यते महिमानं महादे
वि जिह्वाकोटिशतैरपि इदं कवचमज्ञा
त्वा यो जपेत्तु मन्त्रं शिवे सततलक्षप्रजप्ता
पि तस्य विद्या न सिद्ध्यति अदातव्यमिदं
वर्म मन्त्रगर्भं रहस्यकम् अवक्तव्यं महा
पुण्यं सर्वसारस्वतप्रदम् अदीक्षिताय यः
नो दद्यात् कुचैलाय दुरात्मने न देयं परशि
ष्येभ्यो भक्तेभ्योपि विशेषतः शिष्येभ्यो
भक्तियुक्तेभ्यः प्रदेयं भावनावशात् इति
श्रीदेवदेवेशि वर्मकामेश्वरस्य तु गुह्यं
गोप्यतमं सगोप्यं कथितं तव भक्तितः इ
त्येषपटलो देवि परमाद्भुतकारणः क

ष्ठितोदेवदेवेशितवभक्तिवशान्मया न
वक्तव्यो न दातव्यो दीक्षाहीनाय पार्वति
यथा वह्न्युपनीतो यो सिद्ध्यश्च फलकोम
नः यावत्कालं भवेद्दुस्तावत्तत्फल-
दायकः नचेद्दुरो भवेदेवि सिद्धिहा-
निर्भवेद्धुवम् रहस्योद्घाटनाद्यस्मान्
महिमा हीयते मनोः तस्मात्सर्वत्र गो-
प्यः साधकैः पटलोत्तमः यथेष्टका
मदश्चेह परत्र मोक्षदः प्रिये । इति-
श्रीविश्वसारतंत्रे पार्वतीपरमेश्वरसंवा
दे श्रीकामेश्वरकवचं संपूर्णम् समाप्त
मिति भद्रम् शुभमस्तु सर्वजगताम्

5

का ५

प्रा॰ व॰ १

ॐश्रीगणेशायनमः ॐहेरंभंक्षेत्रपालं
चवागीशंवटुकंतथा श्रीगुरुंनाथमा
नंदभैरवंभैरवींपराम् १ प्रणम्यविस्मा
रिस्यानागमज्ञान्गुरून्तस्मात् प्रायश्चि
त्तंप्रवक्ष्यामिसर्वतंत्राविरोधतः २
साधकानांचपुत्राणांदीक्षितानांशि
वागमे योगिनीवीरमेलापेप्रसादः
स्खलभःखलः ३ मनसश्चचलत्वा॰
च्चमंत्रहीनतयापिच कामिनीनांच
संसर्गात्कर्महीनाश्चकालतः ४ प्रा
यश्चित्तविहीनस्यफलभोगायकेव॰
लम् सर्वसाक्षीमहादेवोनरकानसृ
जत्प्रभुः तस्मात्सर्वप्रयत्नेनप्रायश्चि
त्तमिहैवतु कृतस्यकर्मणःकुर्यादनु
तापोभवेद्यदि ६ प्रमादिकमहादोष
प्रविलापनकारणम् प्रायश्चित्तंपरं
सत्यंश्रीगुरोःपादुकास्मृतिः ७ य॰
स्यश्रीपादरजसारंजितेमस्तकेशिवः

रमतेसहपार्श्वस्थातस्मैश्रीपादुकास्तुतिः
योमोहतमसाक्रांतमुद्धरेदेयकृपनः
केवलंकृपयानाथतस्मैश्रीपादुकास्तु
तिः १ यस्मैत्रैलोकमाखिलंसच्चिदानं
दलक्षणम् दृश्यतेस्वगुणैःशक्त्यातस्मै
श्रीपादुकास्तुतिः २ यस्मैसर्वस्वमा
त्मानमप्येकीकृत्यभक्तितः समर्पया
तितच्छिष्यस्तस्मैश्रीपादुकास्तुतिः ३
यमाश्रित्यात्मविज्ञानसंविदेहगयाम
हेदेहकंतुःखिनामूर्त्तिस्तस्मैश्रीपादु
कास्तुतिः ४ यस्मिन्सृष्टिस्थितिध्वंस
पिधानामग्रहात्मकम् प्रकाशतेपंच
कृत्यंतस्मैश्रीपादुकास्तुतिः ५ मूले
हृदिललाटेचद्वादशांतेपरःशिवः य
स्याज्ञामात्रमापन्नस्तस्मैश्रीपादुका
स्तुतिः ६ अनंतदृष्टभेदस्ययशोःपा
शविमोचनम् यमाहुः शांभवीवाचस्त
स्मैश्रीपादुकास्तुतिः ७ अस्मयादतले

गु. वं. २

2

ष्ठिंयुःपादाग्रेकुलपर्वताः गुल्फेनक्ष
त्राण्युदितानितस्यश्रीपादुकास्मृतिः १६ व
नस्पतिस्तथारोमाणि शन्तनुद्वयंजङ्घ-
योः जान्वोश्चाहंत्रसंदोहस्तस्यश्रीपा
दुकास्मृतिः १७ ऊर्वोश्चसिद्धवीरेन्द्रालि
ङ्गमूलेचभैरवाः लिङ्गाग्रेस्मरसोयस्य
तस्यश्रीपादुकास्मृतिः १८ आधारेप
रमाशक्तिर्नाभिचक्रेहृदाज्ञयोः योगि
नीनांचतुःषष्टिस्तस्यश्रीपादुकास्मृतिः
१९ हृदयेमातरःकण्ठेशिरःपीठोपपी
ठयोः चिबुकेयस्यदेवाश्चतस्यश्रीपा-
दुकास्मृतिः २० यक्षाःकपोलयुग्मेच।
जिह्वाग्रेचसरस्वती यस्यदन्तेषुमन्त्रा
श्चतस्यश्रीपादुकास्मृतिः २१ स्कन्देच
विघ्नराट्देवानेत्रेचतेजसोत्रयम लिङ्ग
त्रयंललाटेचतस्यश्रीपादुकास्मृतिः
२२ इडापिङ्गलयोरन्तर्गङ्गाचयमुनात
था मध्येसरस्वतीयस्यतस्यश्रीपादु

कास्मृतिः २३ शुक्लरक्तपदद्वंद्वं मस्तके
यस्य राजते शांभवं वत्तयोभिध्येतस्य श्री
पादुकास्मृतिः २४ गुरुः शिवो गुरुर्वि
ष्णुः गुरुर्ब्रह्मा गुरुः परः गुरुरग्निर्गुरु
र्मंत्री भानुरिंदुस्तथैव च २५ अस्मात्स
र्वं सप्रपंचं निष्प्रपंचाद्गुरोस्तुतिः त-
स्माच्छ्रीपादुकाध्यानं सर्वपापनिकृंत
नम् २६ पालनाद्दुरितच्छेदात्कामि
तार्थप्रपूरणात् पादुकाशब्दमात्रा-
र्थं विमृशन्मूर्ध्नि पूजयेत् २७ इति
शास्त्रार्थसंकेतरहस्यं कुलशासने
शक्तुलास्यवशाद्गुक्रमस्माभिर्विनु
गृहात् २८ श्रीगुरोः पादुकास्तोत्रंप्रा
तरुत्थाय यः पठेत् नश्यंति सर्वपापा
नि वह्निना तूलराशिवत् २९ पठि
तव्यं प्रयत्नेन श्रोतव्यं भक्तिशालिभिः
भोगमोक्षार्थिभिस्तस्मात्सद्भिरागम
पारगैः ३० इति श्री गुरुवरपादुका

कास्मृतिः समाप्ता शुभम्

ॐ श्रीगणेशाय नमः ॐ नमो भगवते स-
दाशिवाय नमः ॐ अस्य श्रीभुवनेश्वरी
मन्त्रराजस्य दक्षिणामूर्तिः ऋषिः पंक्ति-
श्छन्दः श्रीभुवनेश्वरी देवता ह्रीं बीजम्
श्रीं शक्तिः क्लीं कीलकम् ममधर्मार्थका-
ममोक्षार्थे श्रीजपे विनियोगः इति कृ-
ताञ्जलिः स्वात्मानमेव श्रीदक्षिणामूर्ति
ये ऋषये नमः शिरसि पंक्तिच्छन्दसे न-
मो मुखे श्रीभुवनेश्वरीदेवतायै नमो
हृदि ह्रीं बीजाय नमो गुह्ये श्रीं शक्तये
नमः पादयोः क्लीं कीलकाय नमो नाभौ
ममधर्मार्थकाममोक्षार्थे श्रीजपे विनि
योगः सर्वाङ्गेषु इति ऋष्यादिन्यासः अ-
थ करन्यासः ह्रां अंगुष्ठाभ्यां नमः ह्रीं
तर्जनीभ्यां स्वाहा ह्रूं मध्यमाभ्यां वषट्
ह्रैं अनामिकाभ्यां हुम् ह्रौं कनिष्ठिका-
भ्यां वौषट् ह्रः करतलपृष्ठाभ्यां फट्
अथ षडङ्गन्यासः ह्रां हृदयाय नमः ८

ह्रीं शिरसे स्वाहा ह्रूं शिखायै वषट् ह्रैं कव
चाय हुम् ह्रौं नेत्रत्रयाय वौषट् ह्रः अस्त्रा
य फट् अथ ध्यानम् उद्यद्दिनेशद्युतिमिं
दुकिरीटां तुङ्गकुचां नयनत्रययुक्ताम्
स्मेरमुखीं वरदाङ्कुशपाशाभीतिकरां।
प्रभजे भुवनेशीम् इति श्री परदेवतां
निमीलन्नयने स्वहृदयकमले स्वाभे-
देन ध्यात्वा ॥

ॐ ह्लीं बगलामुखी सर्वदुष्टानां वाचं
मुखं पदं स्तंभय जिह्वां कीलय बुद्धिं वि
नाशय ह्लीं ॐ स्वाहा ॥

ॐ श्रीगणेशाय नमः भैरव उवाच ॐ
अधुना देवि वक्ष्येऽहं कवचं मन्त्रगर्भि-
यम् यं पठित्वा साधको भूमौ देवि रुद्र-
रवो यथा कवचस्यास्य देवेशि कवि
वट्कभैरवः पंक्तिश्छन्दः समाख्यातः
त्रिकूटा देवतेरिता ऐं बीजं सौः तथा
शक्तिः कामराजस्तु कीलकम् ध
र्मार्थकाममोक्षार्थे विनियोगः प्रकी
र्तितः श्रीं श्रीं श्रीं मे शिरः पातु षोडशी
देववन्दिता ह्रीं ह्रीं ह्रीं मे वक्त्रं नेत्रे देवी
ज्वालामुखी सदा क्लीं क्लीं क्लीं मे वक्त्र
ं देवी मातंगिनी परा सौं सौं सौं मे
भुजौ पातु देवी महापिशाचिनी ॐ
ॐ ॐ मे वक्षो देवी चाण्डालिनी स-
दा क्रीं क्रीं क्रीं मे पातु नाभिं देवी द्राविं
शद्वरी हूं हूं हूं मे वज्जानू देवी श्रीउ
ग्रतारिणी स्त्रीं स्त्रीं स्त्रीं पातु मे जंघे
देवी नीलपताकिनी श्रीं ह्रीं क्लीं पातु

ॐ १

मे पादौ महात्रिपुरसुन्दरी ऐं सौः क्लीं पा
तु मे शेषवपुः श्रीं ह्रीं ॐ सुन्दरी ॥
इतीदं कवचं गुह्यं वारणात्कामनावह
म् सिद्धं साध्यं सिद्धिदं च गोपनीयं म
हेश्वरि ॥

ॐ श्री देव्यै नमः पंचह्रस्वाः संधिवर्णा
श्चैमेशाग्निजलंयरा आद्यमंसंहितौ
यंचचतुर्थंमध्यमंक्रमात् पंचवर्गा
स्तथाणिस्पर्शान्तःस्थेतेंद्रुभिः सह प
श्चामृतलिपिःप्रोक्तासर्वतंत्रेषुगोपि
ता अइउऋलृएऐओऔहयरवल
कङखघगचजझञफजटणढहुडु।
तनथधदपमफभवशषस ॥ ॐ
श्रीगुरवेशिवायनमः ॐ श्रीगणप
तयेनमः ॐ अस्य श्रीकामेश्वरभैर
वमंत्रस्य दक्षिणामूर्तिऋषिः पंक्ति
छंदः श्रीविद्येश्वरो महाकामेश्वरो
देवता श्रीं बीजं ह्रीं शक्तिः क्लीं की
लकम् श्रीश्रीविद्यासाधने श्रीजपे
विनियोगः श्रीदक्षिणामूर्तयेऋष
येनमःशिरसि पंक्तिछंदसेनमोमु
खे श्रीविद्येश्वरमहाकामेश्वरदेवता
येनमोहृदि श्रीबीजायनमोगुह्ये।

ॐ

ह्रौं शक्तये नमः पादयोः क्लीं कीलका-
य नमो नाभौ श्रीविद्यासाधने श्रीजपे
विनियोगः सर्वांगेषु ऐं अंगुष्ठाभ्यां नमः
क्लीं तर्जनीभ्यां स्वाहा सौः मध्यमाभ्यां
वषट् ऐं अनामिकाभ्यां हुम् क्लीं क-
निष्ठिकाभ्यां वौषट् सौः करतलपृष्ठा-
भ्यां फट् ऐं हृदयाय नमः क्लीं शिरसे
स्वाहा सौः शिखायै वौषट् ऐं कवचा-
य हुं क्लीं नेत्रत्रयाय वौषट् सौः अस्त्रा-
य फट् अथ ध्यानम् ॐ सूर्यकोटिप्र-
तीकाशं चंद्रमौलिं त्रिलोचनम् पा-
शांकुशधनुर्बाणान्धारयंतं शिवंभ-
जे इति स्वाभेदेन ध्यात्वा यथाशक्ति
जपं विधाय जपांते ॐ गुह्यातिगु-
ह्यगोप्ता त्वं गृहाणास्मत्कृतं जपम्
सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महे-
श्वर इत्यनेन जपं समर्प्य प्रणामेन

ॐ श्रीदेव्यै नमः ॐ गंगा पुष्कर नर्मदा
यमुना गोदावरी गोमती गंगाद्वार गया
प्रयाग बदरी वाराणसी सिंधु रेवा से-
तु सरस्वती प्रभृति भुवनलोकभाण्डोद-
रे तीर्थस्नान सहस्रकोटिफलं श्रीच-
क्रपादोदकम् ॥ सार्धत्रिकोटितीर्थे-
षु स्नानाद्यत्फलमश्नुते तत्फलं लभते
भक्त्या कृत्वा श्रीचक्रदर्शनम् ॥

ॐ श्रीगुरवे शिवाय नमः
ह्रीं भुवनेश्वर्यै सिद्धिदायिन्यै नमः

श्रीं भुवनेश्वर्यै नमः

ह्रीं	ह्रीं	ह्रीं
ह्रीं	ह्रीं ५	ह्रीं ३
ह्रीं २	ह्रीं भुवनेश्वरि मम मनोभीष्टं [illegible]	ह्रीं ४

ह्रीं भुवनेश्वर्यै सर्वसिद्धिदायिन्यै नमः

६	१	८
७	५	३
२	९	४

२	७	६
९	५	१
४	३	८

२	९	४
७	५	३
६	१	८

६	७	२
१	५	९
८	३	४

ॐ श्रीगणेशाय नमः ॐ अथ श्रीयंत्रशो
धनविधिः अथ प्रयोगः तत्र कृतनित्य
क्रियः स्वस्तिवाचनपूर्वं संकल्पं कुर्यात्
अद्येत्यादि अमुकगोत्रः श्रीअमुकदेव
शर्म्मा अमुकदेवतायाः पूजार्थममुक
देवतायायंत्रसंस्कारमहं करिष्ये इति
संकल्पं न्यासं कुर्यात् ॐ अस्य श्रीयंत्र
शोधनमंत्रस्य शिवऋषिः त्रिष्टुप्छं
दः पराशक्तिर्देवता श्रींबीजं ह्रींश
क्तिः क्लींकीलकं श्रीचक्रशुद्धिसिद्ध्य
र्थं न्यासे विनियोगः इति स्मृत्वा न्यासं
कुर्यात् ततो मूलमंत्रादिन्यासं चरेत्
ततः षडंगः ततो मातृकान्यासः अर्ध
नारीश्वरन्यासः लयांगन्यासः इति न्या
सान्विधाय पंचगव्यमानीय ह्रौं इति मं
त्रेण ष्टोत्तरशतमभिमंत्र्य प्रणवेनोपं
यंत्रं तद्विस्थाततडतोल्पमात्रेतारेस्थाप
येत् ततः पंचामृतमानीय ह्रौं इति

ॐ १

मंत्रेण पूर्ववच्छोधयित्वा स्नापयेत् तत्र
क्रमः प्रथमं क्षीरेण स्नापयित्वा पुन
र्जलेन स्नापयित्वा धूपं दद्यात् एवं दध्ना
घृतेन मधुना शर्करया च ततो गन्धेन
शीतलजलेन चंदनेन कस्तूरीकुंकु
मेन च ततोऽष्टभिः कलशैः कषायजल
संपन्नैः कुंकुमगोरोचनचंदनमिश्रितै
स्तोयैः स्नापयेत् सर्वत्र स्नानान्ते मूलमं
त्रेण स्वधामंत्रेण वा ततो यंत्रं मृत्तोल्प
कृष्णाग्रेण तं स्पृष्ट्वा यंत्रराजाय विद्म
हे महायंत्राय धीमहि तन्नो यंत्रः प्रचो
दयात् इत्यष्टोत्तरशतमभिमंत्र्य प्रा
णप्रतिष्ठां कुर्यात् ततो देवतामावाह्य
षोडशोपचारैः पंचोपचारैर्वा पूजयेत्
ततः पट्टसूत्रादिकं कृत्वा अष्टोत्तरस
हस्रं शतं वा जप्त्वा शक्त्या बलिं दद्यात्
ततोऽष्टोत्तरशतहोमं कृत्वा प्रत्याहुति
संपातं यंत्रे दद्यात् होमाभावेपि द्विगु

णोजपःकार्यः ततोदत्तिणोदत्वाऽत्ति-
द्राावरणंकुर्यात् पंसौः पंसौः चक्रेश्वरि
यंत्रसौवर्णेशोधयशोधय स्वाहेतिस्व
र्णयंत्रमंत्रः ॐह्रुंॐचक्रेश्वरिराजतं
शोधयशोधय स्वाहेतिराज.... यंत्रमं
त्रः ॐत्रुंॐह्रींॐत्रांताम्रेश्वरियंत्रशो
धयशोधयस्वाहाइतिताम्रयंत्रमंत्रः
ॐश्रीह्रींॐस्फाटिकयंत्रकुलाविके
शोधयशोधय स्वाहेतिस्फाटिकयंत्र
मंत्रः यंत्रशोधनविधिः समाप्तः

ॐमायाकुण्डलिनीक्रियामधुमती
कालीकलामालिनी मातंगीविज
याजयाभगवतीदेवीशिवाशांभवी
शक्तिःशंकरवल्लभात्रिनयनावाग्वा
दिनीभैरवी ह्रींकारीत्रिपुरापरापर।
मयीमाताकुमारीत्यसि ॥

ॐ श्रीप्रपामांबायैनमः ॐ श्रीभैरवउवा
च ॐ सर्वंहिकथितंपूर्वंकवचंनप्रका
शितम् इदानींप्रेमभावेनकथयस्वममा
ग्रतः श्रीभैरवउवाच कालिकाकमला
कालीकालरात्रिस्वरूपिणी मुंडमाला
देहस्थाकवरीचप्रियावतु ममगात्रा
णिसर्वाणिकालिकाव्योममनोहरी शि
रोमेपातुचामुंडाकंठंपातुहृमध्यजा हृ
दयंपातुमाहेश्वरीवैष्णवीनाभिमंडले
नितंबंपातुरक्ताह्रींमध्यंपातुरणप्रि
या विशालाक्षीपातुगुह्यमूरुयुग्मंत
थांबिका जानुयुग्मंमुंडमालागुल्फ
युग्मंललाटिका कमलेपोलयुग्मंच
कामब्रह्मप्रपूजिता पादाग्रंतीर्थपाद
मातुकरांग्रंतीर्थदर्शिनी तीर्थरूपाचतु
न्मूलंभीमापातुतदंगुलीम् करमूलं
करालास्याकरुत्कामातुरावतु मणि
बंधंजटाधारीकरांग्रंशिवदावतु क

का॰
क॰ १

गं शङ्खगलं पायात्सिद्धिदात्री सदानवम्
कामदुघा वामपार्श्वं दक्षिणं मां सशोभे
रा अट्टहासा चण्डी वामे सदा रक्षतु खेच
री दक्षबाहुस्थलं पातु देवी विन्ध्यनिवा
सिनी ककुत्स्थानं सोमराज्ञी मणिबन्धं
शिवावतु दक्षहस्ताग्रनखतलं मूलाधा
रनिवासिनी पृष्ठं रक्षतु गोविन्दा ऊर्ध्वं र
क्षतु हस्तिनी ललजिका दक्षनेत्रं वामं
रक्षतु मानदा दक्षश्रोत्रं सोमराजी नासा
युगं भयंकरी ओष्ठाधरं क्षेमकरी दन्ता
न्रक्षतु वैश्वरी गण्डं रक्षतु भोगामी चिबुकं
मुण्डधारिणी मेढ्रदण्डं ललाटादीनि सर्वं र
क्षतु कालिका श्मशाने मे पातु निर्व्याजि
का उग्रभक्तवत्सला चित्तं रक्षतु कौशाम्बी
वचनं चारुभूषणा वायुं रक्षतु मोत्कटा
प्राणान्रक्षतु संयमी इदं तु कालिकादे
व्याः कवचं सर्वकामदम् प्रातःकाले शु
चिर्भूत्वा मध्याह्ने वा शुचिस्मितः संध्या

यो वा पठेन्मंत्री तस्य राज्ञा वशो भवेत्
मंत्रिणां बंधुवर्गो च दासश्चैव राजने प
ठेद्वा पाठयेद्यो पि भक्तियुक्तः पठेत्सुधीः
कवितां विपुलां लब्ध्वा वाग्मी भवति ना
न्यथा सचिरायुः स्याद्विपुत्री पुत्रं जानेयः
पठेत्सदा नचव्याधिर्नैव भेदी न विवादी
जितेंद्रियः सर्वान्कामानवाप्नोति कव
चस्य प्रसादतः ॥ इति श्रीकाली-
कल्पे कालिकाकवचं समाप्तम् शुभं

पुरश्चरणविधये आसनशुद्ध्यादि भू
तशुद्ध्यादिकं कृत्वा अन्तर्यजनं तं कृ
त्वा संकल्पं विरच्य स्वस्वपद्धत्युक्तक्र
मेण श्रीदेवतां संपूज्य दीपप्रज्वालि-
तेदेवीं हृदये कृत्वा प्रातःकालमार-
भ्य मध्याह्नं यावज्जपं कुर्यात् ततोऽहो

२ मः ततोपितृतर्पणम् तर्पणं तननः कुर्यात्तीर्थोदैश्चंड्रुसिष्ठितैः इति कुलार्णववचनात् ततोमार्जनम् नमः मूलमुच्चार्यामुकदेवतां तर्पयामि नमः इति कुंभमुद्रया स्वमूर्ध्नि समभिषिंचेत्

ततोब्राह्मणभोजनम्

माक्षिकं पलं १ मीसी पलं १ त्रि। गुणं क्षीरं सोपारी। पानजद। कतं। एला। सुगंधिपत्र। लवंग। दार्चीणी। जपलवत्री। रसायनमिदं महद्धरिहरप्रियंकानकम्॥

श्रीविद्यापद्धतिसूची

आदौ पटलम्

श्रीविद्यापद्धतिसूची समाप्ता ॥

दे:
८८
१

ॐ श्रीगणेशाय नमः ॐ नमो भगवते स्व
शिवमूर्तये नमः ॐ नमो देव्यै ॐ श्रीदे
व्युवाच ॐ भगवन्सर्ववेत्ता त्वं जगतामु
पकारकः देवादिदेव देवेशि त्रैलोक्या
भयदायकः प्राक्त्वरासुरसंग्रामे मह्यं
दत्तो वरस्त्वया तदद्य कृपया शंभो सम्प्र
दत्तमो भव॥ श्रीभैरव उवाच ५ देव स
म्वरो दत्तो देवदानवसंगरे यत्ते मनसि
भीष्टं तत्त्वं वदस्व सुव्रते २ श्रीदेव्युवाच
भगवन्सर्वधर्मज्ञ सकलागमपारग दे
व देवी महादेवी महात्रिपुरसुंदरी १२
त्रिकूटाख्यो तु श्रीदेवी श्रीविद्याब्रह्मरूपि
णी तस्याः पंचांगमखिलं सारात्सारोत्त
मोत्तमम् ५ वद शीघ्रं महादेव यद्यहं प्र
यसी तव लक्षवारसहस्राणि वारितासि
पुनः पुनः देवदेवि महादेवि पुनः संप्र
रिपृच्छसि ७ शृण्वाहं कृपया देवि नवा
प्रीत्या महेश्वरि महात्रिपुरसुंदर्याः पं

चांगं तं ब्रवीम्यहम् श्रीविद्यात्रिपुरादेवी
जगद्वैतन्यरूपिणी त्रिकूटाषोडशीवि-
द्या महाश्रीषोडशाक्षरी ९ या देवदेवी।
जगतां सृष्टिस्थितिलयात्मिका सा महा-
षोडशी विद्या महात्रिपुरसुंदरी १० सा
ऽंदेयं शिरो देयं देया सम्यक्तदार्थिने
वस्तु पूर्णं राष्ट्रं देयं न देया षोडशाक्षरी ११
गोप्यं गोप्यतमं विद्यां गुह्यं च परजन्मनः
गुह्याति गोप्यं गुप्तमं साधकाग्रेन गोप-
येत् १२ त्रिपुरेशी महाविद्या प्रभाव स-
हिता कलौ अवस्थारूपिणी विद्या बाला
भवति प्रोढिकाः १३ सुंदरी त्रिपुरा बा-
ला प्रोक्ता पंचदशाक्षरी देवी त्रिकूटा।
श्रीविद्या महाश्रीषोडशाक्षरी १४ महा-
श्रीषोडशाक्षर्याः पंचांगं वक्ष्मि सादरम्
महाश्रीषोडशाक्षर्या मंत्रोद्धारं ब्रवीम्यहं १५
यंत्रोद्धारं तथा ध्यानं प्रयोगान्षड्वक्ष्या-
म्यहम् यथा लक्ष्मी परा मदनवाम्भव शा-

दे:
पट.
२
2

क्लिपुस्तात्तारं च मूर्तिकमलाकथिता पि।
विद्या शास्त्रादिकं तु विपरीतं तथा च प्रो
क्तं श्रीषोडशाक्षरविधिः शुभदोक्षपर्णः
इति मंत्रोद्धारः अस्याः श्रीषोडशाक्षर्याश्च
मरदोषो न विद्यते मंत्रोत्कीलनदोषो वा मं
त्रसंजीवनस्य च संपुटस्य विना देवि शुर।
स्मरणा कर्मणा गुरुहस्तेन वा देवि साधक
स्य करेणका पुरश्चर्या प्रकुर्वीत वर्णलक्षं ज
पावयिपु न कदाचित्कुर्वीत स्वहस्तेन च।
साधकः न तिथिर्न च नक्षत्रं नो गणमासः
नं मंत्रिणाम् न वारदोषो नो विघ्नो नाशौचं
नियमो न च साक्षाद्मतनूपोयं मंत्रः श्री
षोडशाक्षरः ऋषिः स्याद्दक्षिणामूर्तिः पं
क्तिश्छंद उदाहृतः देवता च मया प्रोक्ता म
हात्रिपुरसुंदरी लक्ष्मीबीजं परा शक्तिः
कामराजस्तु कीलकम् चतुर्वर्गेषु वि।
धार्यां विनियोगः प्रकीर्तितः यंत्रोद्धारं
प्रवक्ष्यामि सर्वशापपरिहारकम् सर्वसंमो।

हनं यंत्रं सर्वसिद्धिप्रदायकम् अथ यं-
त्रोद्धारः बिंदुत्रिकोणवसुकोणदशार
युगमन्वश्रनागदलसंगतषोडशारम्
वृत्तत्रयं च धरणीसदनत्रयं च श्रीचक्र-
राजउदितः परदेवतायाः ५ इति अथ
ध्यानं प्रवक्ष्यामि सर्वतंत्रेषु गोपितम्
सारं त्रिपुरसुंदर्य्याः सर्वस्वमम पार्वति
येन ध्यानेन ब्रह्माण्डकटाहांतं विलीय
ते ॥ उत्तप्तहेमरुचिरां रविचंद्रवह्नि ने-
त्रां धनुःशरयुतांकुशकामपाशान् २
स्मेर्भुजैः च दधतीं शिवशक्तिरूपां का-
मेश्वरीं हृदि भजामि धृतेन्दुलेखाम् इ
ति ध्यानम् अनेन ध्यानमात्रेण ब्रह्मा
विष्णुर्हरः शिवो ब्रह्मादयः सुरगणा जा
तानि संदधद्धषः कथयाम्यद्य देवेशि
स्तंभनादिविधिं परम् यं विधाय महेशा
नि साधको योगवान्भवेत् स्तंभनं मो
हनं चैव मारणं कर्मणो तथा वशीका-

दे॰
पल॰
३

ोच्चाटनकोशांतिकपौष्टिकंतथा
सान्तानिकं मौक्तिकंचप्रयोगादृशकी
र्तिताः स्तवनेरविवारेतुस्नात्वा नमा
मन्तुशिवे यस्तुस्नाद्यभवेन्नृणांस्तवनं
त्वरितकलौ तारंरमांपरंतारंकूटद्वयं
यस्तुदीरयेत् तारंपरांरमांतारंफट्सप्त
मनकरोत्स्वहृदयम् प्रकाशः ॐश्रींह्रींॐ
कएईलह्रींहसकहलह्रींसकलह्रीं
ॐह्रींश्रींॐफट् ॥ गतेःसूर्यस्यचंद्र
स्यवह्निवातादिपाप्यस्याम् रिपुसेना
दिरस्तूनांस्तवनेजायतेध्रुवम् इति
स्तवनम् रवौस्नात्वानदीतीरेजपेन्म
लमहेश्वरि यस्योच्चारणमात्रेणमोह
मायातिभैरवः तारंकामःशारंतारंकूट
द्वयमतःपरम् शारंकामंभुवनंस्तारंफ
ट्सप्तहृन्मनुःस्मृतः प्रकाशः ॐक्लीं
सौः ॐकएईलह्रींहसकहलह्रींस
कलह्रींसौःक्लींसौफट् देवानांचन

रेशानांस्त्रीणामप्सरसांतथा सद्योदर्पी।
नमात्रेणमोहनंजायतेध्रुवम् इतिमोह
नम् रवौश्मशानेमंत्रस्यजपंकृत्वामहे:
श्वरि आनीयभस्ममुष्टिंचक्षिपेच्छत्रुय
हेपथि सप्ताहान्म्रियतेशत्रुः साधक
स्तनसंशयः तारंकालींचकूर्चंचत्रिकू
टापदमुद्धरेत् कूर्चंकालींतथातारंफ
ट्मरणमनुस्मृतः ॐक्रींहूंकएईलह्रीं
सकलह्रींहूंक्रींॐफट् ॥ नृपोवानृप
पुत्रोवाविप्रोवाक्षत्रियोपिवा शत्रुका
लसमानोपिमृत्युमेष्यतिभैरवि रवौ
मंत्रंजपेत्स्नानः कामीसाधकसत्तमः रं
भाद्यप्सरसांदेविभवेदाकर्षणंतथा
तारंमारंवाग्भवंचकूटत्रयमुदीरयेत्
चेंद्रसारंतथातारंफडाकृष्टिमनुस्मृतः
ॐक्लींऐंकएईलह्रींहसकलह्रींसक
लह्रींऐंक्लींॐफट् प्रकाशः अस्योच्चा
रणमात्रेणसकृदाकर्षणंभवेत् रंभा।

स्वर्गस्थितावापिप्रातःप्रादुर्भविष्यति देवो
मध्याह्नसमये स्नात्वा मूलं जपेच्छिवे ज
प्राशीघ्रं वशं याति त्रैलोक्यं सचराचरम्
तारं परं स्मरं तारं कूटत्रयं महेश्वरि तारं
स्मरः परं तारं फट् वशीकरको मन्त्रः ॐ
ह्रीं क्लीं ॐ कएईलह्रीं हसकलह्रीं सक
लह्रीं ॐ क्लीं ह्रीं ॐ फट् । अस्योच्चारण।
मात्रेण देवा अपि महेश्वरि सद्यः किंकर
तां यान्ति किं पुनः क्षुद्रभूमिपाः इति वशी
करणम् देवो गव्याज्यसम्प्रान्ते जपेन्मंत्र
महेश्वरि रिपुमुच्चाटयेद्देवि सार्वभौममम
पिप्रिये इत्युच्चाटनम् देवो जपेन्मंत्रं देवि
दशवारं यथाविधि त्रिवारं सर्वरोगाणां
सद्यः शान्तिर्भविष्यति तारं शारस्मराका
मः कूटत्रयमनुस्मरेत् कामः परः शारता
रं फट् शान्तिककरो मन्त्रः ॐ एं ह्रीं ह्रीं
क्लीं कएईलह्रीं हसकलह्रीं सकलह्रीं
क्लीं ह्रीं सौः ॐ फट् रोगाणामतिदुष्टी।

नां ग्रहाणां ह्रस्वं वदिते उपद्रवस्य सर्वस्य स
द्यः शांतिर्भविष्यति इति शांतिकम् एवो
स्नात्वा जपेन्मूलं दशावारं महेश्वरि पि·
पासांकितदिग्भावे महावृष्टिः प्रजायते
तारं मायां स्मरस्तारं कूटत्रयमहेश्वरि ता
रं स्मरो मायां तारो फट् पौष्टिककरोस्मनो
ॐ क्लीं क्लीं ॐ कएईलह्रीं हसकहलह्रीं
सकलह्रीं ॐ क्लीं क्लीं ॐ फट् दुर्बलानां न
राणां च पितॄणां च दिवौकसाम् संक्रुद्ध·
स्मारमात्रेण महावृष्टि प्रजायते इति पौष्टि
कम् एवं जपेन्मन्तुं देवि साधको देवतात्म
दे येन जप्तेन वंध्यायां भवेत्पुत्रो न्वयेश्वरः
तारं शारयब्रस्मारं कूटत्रितयमुच्चरेत् ता
रं शारब्रस्मरमायां फट् चमेतानि को मनुः प्र·
काशाम् ॐ सौः सौः ॐ कएईलह्रीं हसक
लह्रीं सकलह्रीं ॐ सौः सौः ॐ फट् वंध्या
याः काकवंध्यायाम् तपुत्राः सुरेश्वरि पु
त्रा भवंति भूमीशाः स्वकुलैकप्रदायकाः

दे॰ पट॰ ५
6

इतिसंतानिकं रत्नोपार्जने पंचमं त्रैतत्त्वरूपम
देश्वरि यस्योच्चारणमात्रेण मौक्तिकं जा॰
यते ध्रुवम् तारं रमा रमा तारं कूटत्रयमु
दीरयेत् तारं रमा रमा तारं फट् मौक्तिक॰
करोद्भवम् ॐ श्रीं श्रीं ॐ कएईल ह्रीं हस
कहल ह्रीं ॐ श्रीं श्रीं ॐ फट् इति मौक्तिक
म इदं हि मम सर्वस्वं रहस्यं त्रिदिवौकसाम
गोप्यं गुह्यतमं देवि न प्रकाश्यं कदाचन इ
ति दशप्रयोगाः अधुना देवि वक्ष्यामि सज्जा
पटलमीश्वरि श्रीदेव्याः षोडशी दर्पाः सज्जा
मातसिंकीं चरेत् सूतके मृतके वापि पथि
कांतारमण्डले म्लेच्छभूमौ च कारागारसंक
टे रणमण्डले मनसैव चरेत् सज्जां त्रिकूटाया
महेश्वरि शृणु त्वं भक्तिभावेन यथावद्वर्णिते
मया उत्थाय शयनाद्देवि ब्राह्मे दिमे मुहूर्ते
के प्रक्षाल्य मुखहस्तांघ्रीनाचम्य त्रिर्महे।
श्वरि प्राणायामत्रयं कृत्वा गुरुं ध्यात्वा स
शक्तिकम् देवीं कामेश्वरांकोपविष्टां का

मेश्वरीं स्मरेत् ध्यात्वा पूर्वेण षड्दीर्घैर्न्यासं

कृत्वा यथाविधि जपेन्मूलं च गायत्रीं गुर

वे च समर्पयेत् आगमवदिरंकारं जपा

त्वारण्यभूमिषु तत्र स्नात्रादि स्सजपवर्णे

कं शौचमाचरेत् रमाबीजेन संशोध्य दं

तान्स्नायकसत्तमः मायाबीजेन गण्डूष

त्रयं कुर्यात् महेश्वरि मूलेन देवि तीर्था

नि तदा वाहस्व सिद्धये ॐ गंगे च यमुने चैव

गोदावरि सरस्वति नर्मदे सिंधु कावेरि

जलेस्मिन्सन्निधिं कुरु इमावाह महादेवि

देवीमावाहयेत्ततः मूलेन त्रिःसमुत्स्म

नयस्वसि महेश्वरि ततो मूलं जपेन्मंत्री ।

गायत्रीं च विशेषतः सूर्यायार्घ्यत्रयं दद्या

देवदेवास्तथैव च ॐ त्रिपुरे देवि विद्महे ।

आदिकूटसमन्विते कामेश्वरी धीमहि च

द्वितीयकूटभूषिते तृतीयकूटपूर्वे च त ।

नः क्लिन्ने प्रचोदयात् प्रकाशं कएईलह्रीं

त्रिपुरे देवि विद्महे हसकहलह्रीं कामेश्वरि

दे॰
पद्ध॰
९

6

धीमहि सकलं ह्रीं ततः क्लिन्नाश्वदोदयात्
१ जलादारुसवामांसास्थिपरिध्याय्य च स्वाय
कः संध्यासु मनसा कृत्वा चाघमर्षणपू
र्वकम् संध्यां निर्हृत्य देवेशि यागगेहं त
तो व्रजेत् ततो द्वारार्चनं कृत्वा कुर्यादास
नशोधनम् भूतशुद्धिं ततः कृत्वा प्राणा
यामविधिं ततः षोडशन्यासभावेन देहं दे
वमयं चरेत् मनसा वर्णभागोक्तं श्रीचक्रं
तत्र भावयेत् बिंदुत्रिकोणवसुकोणद
शारयुग्ममन्वस्रनागदलसंगते सादिप्रा
गुक्रम् विभाव्य तत्र श्रीचक्रं हृदये स्वाय
कोत्तमः योगपीठं ततोभ्यर्च्य ह्रूं त्वं घं रं ले
वं इति बिंदौ कामेश्वरांकोपविष्टां कामेश्व
रीं स्मरेत् पात्राणि स्थापयेत् तत्र त्रिकोणवृ
त्तनिर्मिते चतुरस्रमण्डले च विधाय गंधपि
कांबुभिः सामासा ह्रौं त्रिकूटाया मण्डलं पू
जयेच्छिवे चतुरस्रमण्डले च समभ्यर्च्य
चरेत् ततः ॐ अस्त्राय फट् इति सेवसंस्थाप्यात्र

त्रिपादिकाम् तत्रास्त्रक्षालितं शंखं सम
भ्यर्च्य तथास्त्रधीः तत्रार्कमण्डलं देवि सो
मवन्हीन्दुमण्डलम् संपूज्य मूलमंत्रेण
कलाभिस्तेषां समर्चयेत् । मूलाष्टमंत्रितं
देवि विधाय तीर्थवारि च तेनार्घ्यं शिवे
शंखं शंखमुद्रां निवेद्य च तीर्थमावाह्य
देवेशि षडंगं तत्रैव भावयेत् सामान्यार्घ्य
स्य वामे तु शोभितं कलशं शिवे अग्रे चै
व षडंगं चतुरस्रं त्रयीश्च मण्डलम् पूज्या
त्वैतैः समभ्यर्च्य तत्र कूटत्रयेण च षडं
गन्यासभागेन समभ्यर्च्य षडश्रकम् च
तुरश्रं तथाभ्यर्च्य संस्थाप्यात्रिपादिकां
कलाः सूर्येन्दुवह्नीनां समभ्यर्च्य यथा।
विधि कलशेऽस्मिन्महादेवि देवीं संस्थाप
नयेत्तराम् आनंदभैरवं चैव देवि कू
टत्रयेण च मायारमाकामबीजैर्धेनुमु
द्रां प्रदर्शयेत् मत्स्यमुद्रादिनाच्छाद्य
सामान्यार्घ्यस्य दक्षिणे कलशं हेमण्ड

दे·
पल·

लेच विधायास्मं महेश्वरि शांतिपात्रं स·
माधाय मूलेनाष्टाभिमंत्रितम् तत्रैव शो
त्रणीपात्रं तथा वटुकपात्रकम् गुरुपा
त्रादिषु पूर्वतीर्थं स्थापयेदप्यथः पश्चा
कारेण देवि पात्राणि स्थापयेत्ततः पा
द्यार्घ्यमधुपर्काचमनीयपात्रस्रजनम्
द्विधाय तत्र ···· देव्यामासंघ उरूः पूर्वक
म् मणिपूरे ब्रह्मरंध्रे मूलाधारादिके शि
वे शिवशक्त्योः सामरस्यविभावस्याथ
केश्वरः ततः कामकलारूपत्रिपुरीकृत
विग्रहः शिवशक्त्योः पादुकोवतर्पया
मिनमइति स्वस्थादेविसंतर्प्य ततः कू
टत्रयेण च सर्वज्ञताद्यष्टाङ्गाः पूज
नीयाश्चतर्पणैः संतर्पयेत्तु हृल्लेखादि॰
क्रोधादीन्महेश्वरि परापराशक्तियुक्ताः स्मा
लोर्थाश्चैतान्महेश्वरि तत्त्वत्रयेणवाच
म्यशिवपदमयेन्त्वयम् श्रीचक्रदेवदे
वोश्चरूपंध्यात्वा त्रिवर्णिकम् स्थापनं

सन्निधानं च संमुखीकरणं शिवे मुद्रा
भिः साधकः कृत्वा देवीस्वस्थायमर्घ्या
देव्यै देवाय मूलेन शाणान्दत्वा महेश्वरि
शिवशक्त्याः परं पूर्णं ध्यात्वा पूजां समाच
रेत् तत्रादौ देवदेव्योः च पाद्यार्घादीन्नि
वेदयेत् मधुपर्कं निवेद्यापि निवेद्याच
मनीयकम् नानालंकारवस्त्राणि नि
वेद्य साधको नमः नैवेद्याचमनीयादि
शिवशक्त्योर्निवेदयेत् दीपधूपादिसं
भारमपरमान्नं निवेद्य च ताम्बूलं च मुखे
दत्वा ह्यस्त्राय च तर्पयेत् पुष्पांजलिं
च श्रीचक्रे दत्वा पूजां समाचरेत् आदौ
कामेश्वरीं नित्यां पूजयेद् भगमालिनीं
नित्यक्लिन्नां च संपूज्य भेरुण्डां च महे
श्वरि श्रीवह्निवासिनीं नित्यां महावि
द्येश्वरीं ततः शिवदूतीं महेशानि त्वरि
तां पूजयेत्ततः श्रीकुलसुन्दरीं नित्यां
नित्यां नित्यां ततः परम् ततो नीलपता

दे: पत्र: ८

8

कांचविजनयांचमहेश्वरि श्रीसर्वमंगा-
लांनित्यांज्वालामालांततःपरम् चित्रां
नित्यांमहेशानि त्रिकूटांपूजयेच्छिवे पु
नःपश्चाज्जलिंदत्वाश्रीविद्यापूर्वभागयोः
गुरुपंक्तित्रयीपूजातर्पणीयाद्पृथक्प
ध्यक् गुरुपूजांविधायाथत्रिपुरांपूज
येत्ततः त्रिपुरांपूजयाम्यद्यतर्पयामिन
मइति तत्रादौपूजयेद्देवि ऐं क्लीं सौः त्रि
पुरीश्वरीम् त्रिपुरसुंदरींदेविततस्त्रि
पुरवासिनीम् त्रिपुरांपूजयेम्रीं पं
ह्रीं त्रिपुरमालिनीम् ह्रीं श्रीं सौः त्रि
पुरांसिद्धांपूजयेत्त्रिपुरांबिकाम् पूज
येयात्रिकोणमध्ये महात्रिपुरसुंदरीम् इ
ति श्रीचतुरस्रादिवृत्तांतेषु पूजयेत्
नवचक्रेषुदेवेशिनवचक्रेश्वरीःपुनः
पूजनीयाश्चयोगिन्योवामावर्त्तेनपार्व
ति अणिमाद्यास्तथासिद्धीःपूजयेत्ता
यकोत्तमः ब्राह्म्याद्यामातरःपूज्यारेखा

स्तुपरमेश्वरि सर्वसंक्षोभिनीमुद्रा नव
मुद्राः प्रपूजयेत् ततो मूलेन श्रीविद्यां
सन्तर्प्य परमेश्वरीम् पुष्पांजलिं च श्री
चक्रे दत्वा षोडशदले विधेयेत् सर्वाशापूर
काय श्रीचक्राय महेश्वरि दद्यात्पुष्पां
जलिं देवि ततः संपूजयेत्स्थिताम् अं
श्रीकामाकर्षिणीं च नित्याकलापद्मा
न्विताम् अं आं बुद्ध्याकर्षिणीं च तथा इं अहं
काराकर्षिणीम् ईं शब्दाकर्षिणीं च तथा
उं स्पर्शाकर्षिणीम् ऊं रूपाकर्षिणीं नित्यां
ऋं रसाकर्षिणीं तथा ॠं गन्धाकर्षिणीं
नित्यां ऌं चित्ताकर्षिणीं तथा ॡं धैर्या
कर्षिणीं नित्यां एं स्मृत्याकर्षिणीं तथा ऐं
नामाकर्षिणीं नित्यां ओं बीजाकर्षिणीं त
था औं आत्माकर्षिणीं नित्यां अं अमृताक
र्षिणीं तथा अः शरीराकर्षिणीं च षोड
शारे प्रपूजयेत् मूलदेवीं महादेवि सं
तर्प्य साधको नमः सर्वसंक्षोभके चक्रे

दक्षाग्रमंजलिं ततः अनंगकुसुमां दे॰
वीमनंगमेखलां तथा अनंगमदनां देवी
अनंगमदनातुरां संपूज्यानंगरेखां च सं
पूज्यानंगवेगिनीं अनंगांकुशां संपूज्या
संपूज्यानंगमालिनीं संपूज्याष्टदले दे॰
विमूलदेवीं च तर्पयेत् शिवशक्तौ साध
केशः प्रणमेद्योनिमुद्रया ॐसितवक्रकटि
नयध्यायेद्दलस्वरूपकम् सर्वसौभाग्य
दायकश्रीचक्रायमहेश्वरि दक्षाग्रमं
जलिं मंत्री पूजयेत्साधकोत्तमः सर्वसं
क्षोभिणी शक्तिः सर्वविद्राविणी तथा
श्री सर्वाकर्षणी शक्तिः सर्वाह्लादन
कारिणी सर्वसंमोहिनी शक्तिः सर्वस्तं
भनकारिणी श्रीसर्वजृंभिनी शक्तिः स
र्ववशंकरी ततः श्रीसर्वरंजनी शक्तिः
सर्वोन्मादनरूपिणी सर्वार्थसाधनी श
क्तिः सर्वसंपत्प्रपूरिणी सर्वमंत्रमयी
शक्तिः सर्वद्वंद्वक्षयंकरी संपूज्यासा

यकेरेनावामावर्तेन पार्वति कामेश्वरीं
च संतर्प्य प्रणमेद्योनिमुद्रया सर्वार्थसा
धकाख्यचक्राय साधको नमः पुष्पां
जलिं ततो दद्यात्पूजयेत्सिद्धिदेवताः स
र्वसिद्धिप्रदा देवी सर्वसंपत्प्रदा तथा स
र्वप्रियंकरी देवी सर्वसौभाग्यदायिनीं
गंधाद्यैस्ततः समभ्यर्च्य तर्पयेन्मूलदेवतां
कामेश्वरीं च देवेशि प्रणमेद्योनिमुद्रया
सर्वरक्षाकराख्याय चक्राय सुरवन्दिते
दत्वा पुष्पांजलिं देवि पूजयेत्साधको न
मः ह्रीं श्रीं श्रीं सर्वज्ञता देवी सर्वशक्तिः
ततः परम् सर्वैश्वर्यप्रदा देवी सर्वज्ञाना
मयी ततः ततः संपूजनीयाश्च सर्वव्याधि
विनाशिनी सर्वाधारस्वरूपा च सर्वपाप
हरा ततः सर्वानंदमयी देवी सर्वरक्षा
स्वरूपिणी महादेवि महादेवि सर्वेप्सि
तफलप्रदा इति गंधाद्यैस्ततः पूज्या मूलदे
वीं च तर्पयेत् संतर्प्य सर्वां देवीं प्रणमे

दे: पत: ९

10

योनिमुद्रया प्रतोन्तृतीयचक्रं तत्र सूर्यरूपं
स्मरेत् हृदि सर्वरोगहराख्यात्रचक्राय नव
रूपिणे दत्वा पुष्पाञ्जलिं देविं पूजयेद्देव
ताष्टकम् वशिनी वाग्देवता दीकामेश्व
रीततः शिवे मोहिनी वाग्देवता च विमला
ह्यरुणा ततः जयिनी वाग्देवता च पूज्या
सर्वेश्वरी ततः कौलिनी वाग्देवता च पू
ज्यास्ताः स्तर्पयाम्यहम् गंधाद्यैस्तत्र मूला
द्ये मूलदेवीं च तर्पयेत् समाप्तिक्रमवा
मेन प्रणमेद्योनिमुद्रया वाग्देवताष्टकं
पूज्य रक्तपुष्पैर्विशेषतः वामक्रमेण सं
पूज्य ॐ अंत्रतरालचक्राय दत्वा पुष्पाञ्जलिं
ततः दद्यादधोहस्तकमले देव्याः पश्चिमभा
गके जंबिणीं कामबाणं दोर्वामाधोह
स्तभागके मोहनं कामधनुश्च दक्षिणे
दृवितत्करे वशीकारं कामपाशं कामा
ङ्कुशं च स्तवनम् चतुर्भुजकरपद्मेषु पूजये
दायुधानि तु सर्वसिद्धिप्रदा यात्र श्रीच।

क्रायमहेश्वरि दत्वापुष्पांजलिंपूज्जामा
रभेत्साधकोत्तमः कामेश्वरींवज्रेश्वरीं
पूजयेद्भगमालिनीम् कूटत्रयेणदेवे
शित्रिकोणेसाधकोत्तमः इतिसंपूज्य
संतर्प्यमूलेनमूलदेवताम् सर्वानंद
मयायात्रश्रीचक्रायसबिंदवे दद्यात्पु
ष्पांजलिंदेविसाधकःसर्वसिद्धये मूल
विद्यासमुच्चार्यसमवारंमहेश्वरि पूजये
त्साधकोमन्त्रा महात्रिपुरसुंदरीम् इ
क्षोभविष्यति नतस्य दुर्गतिर्देवि कदा
चिदपिजायते दुर्ग्रहाः सुग्रहा यांतिवा
शंगछंतिमानवाः नतस्य विघ्नोभवति
नशोकोभुविजायते वेतालाश्चपिशा
चाश्चराक्षसास्तमयप्रदाः तेसर्वे विलयं
यांतिकवचस्यास्यकीर्तनात् नत्रदेशेन
दुर्भिक्षंनचमारीश्चजायते नचरोगाः
प्रजायंतेनोत्पाताः प्रभवंतिच त्रिविधा
श्चैवयोगिन्यस्तस्यरक्षणसन्निधौ शां
तिंचैवप्रयच्छंतिरक्षंतिपुत्रवत्सदा श
त्रवस्तस्यदेवेशिचिंतनात्प्रलयंगताः
विनश्यंतिनसंदेहो योगिस्तोमहत्वयंति
तान् शांतिकादीनिकर्माणिमारणादी
नियानिच वाक्यमात्रेणदेवेशितस्यसि
ध्यंतिभूतले नपापैर्लिप्यतेसोपिमहो
ग्रैरपिदारुणैः नकालस्यवशंगच्छेत्

जगत्यान्दुःखितः सर्वदाच सुखप्राप्तिः
सर्वतीर्थफलंलभेत् नानेनसदृशः क
श्चित्कवचो भुविजायते देवासुरमनु
ष्याणांस्तवरूपं सुखावहम् येनवित्ता
नमात्रेणस्मरतैनेवच सुंदरि सर्वथा ।
लभतेकामान्मुक्तिमार्गं सगच्छति स
र्वलक्षणहीनोपि स्मरणात्कल्मषापहः
श्लोकवचमाहात्म्यं पठमानस्य नित्यशः
विनापि लययोगेन सयोगस्समतां व्र
जेत् भूर्जे च विसमालिख्य यंत्रमंत्रविनि
र्मितम् मध्येत्रिकोणं संलिख्य साध्यसा
धकयोर्लिपिम् न हर्षे मूलमंत्रांश्च
मातृकादिश्च वेष्टयेत् कालागुरुवि
मिश्रेण चंदनेनापि सुंदरि प्रत्यंगमद्
प्राणिस्वरास्त्रस्तु लभम् गोरोचनाकुं
कुमाभ्यान्तद्वाप्येकवचं लिखित् स्वेतसू
त्रेण संवेष्ट्य लाक्षया परिवेष्टयेत् पंचा
मृतैः पंचगव्यैः स्नापयित्वाभिमेदृति सं

एतस्य देवि रूपां तां मूर्तिं दृष्ट्वा च दक्षिणाम्स प्रा
णप्रतिष्ठां मंत्रेण ज्ञाणां स्तत्र निवेदयेत
अंतर्यामिनिं ततो ध्यात्वा कंठलग्नां धनप्रदां
श्रीविघ्नवश्यकरी देवि कस्यां स्तंभनकारि-
णीम् महाकामभुजे देवि वैरिपक्षक्षयं
करीम् जठरे रोगशमनी पुत्रदा हृदि सं
स्थिता विद्याकरी ललाटस्था शिखायां
तु शुभप्रदा सर्वकामप्रदा देवी सर्वरोग
क्षयंकरी दक्षिणे वा करमूले पि यदि तिष्ठ
ति सर्वदा तदा सर्वार्थसिद्धिः स्यात् यदि म
न सिद्धयते एतस्य कवचस्यैव पठनं धा
रणं प्रिये कथितं तत्त्वं तव स्नेहाद्गोपनीयं
सदा भुवि गुरोः पादप्रसादेन श्रीविद्याय
दि लभ्यते नैव कवचं देवि त्रिषु लोकेषु
दुर्लभम् स च देवो हरः साक्षात्पत्नी च पर
मेश्वरी यस्य भक्तिर्गुरौ देवि कर्तव्या देवव
त्सदा तदा मंत्रस्य तंत्रस्य सिद्धिर्भवति नान्
यथा कवचस्य तथा सिद्धिर्गुटिका च स

रेश्वरि अज्ञात्वा कवचं देवि श्रीविद्यां यो
जपेत्प्रिये न चाप्नोति फलं तस्याः परे च न
रकं व्रजेत् ससंससंस पुनः ससंससंससंस
पुनः पुनः न शक्नोमि प्रभावं हि कथितुं
कवचस्य च जिह्वाकोटिशतैर्देवि वक्त्र
कोटिशतैरपि पंचास्येन कथं देवि व-
र्णितुं शक्यते मया यस्मै कस्मै न दातव्यं
स्वगोप्यमति दुर्लभम् न देयं परशिष्याय
कृपणाय सुरेश्वरि गुरुभक्तिविहीनाय-
परहिंसारताय च निंदकाय कुचेलाय दां
भिकाय सुरेश्वरि यो ददाति निषिद्धेभ्यः
कवचं मन्त्रमुख्योत्तमम् तस्य नश्यति देवे-
शि विद्यायुः कीर्तिसंचयाः तं हिंसंति सदा
देव्यो योगिन्यो मातृमंडलात् परे नरक
माप्नोति जन्मकोटिशतानि च देयं शिष्या
य शान्ताय गुरुभक्तिरताय च सर्वलक्षण
युक्ताय यंत्रमंत्रपराय च ॥ इति श्री
वामकेश्वरीतंत्रे श्रीमहाचक्रपीठे श्री

महाराजराजेश्वरीश्रीमहात्रिपुरसुंदर्याः कवचं संपूर्णम् शुभम् ॥

त्रिपुरसुंदरीकवचं

त्रि॰
सु॰
८

ॐ श्रीगणेशाय नमः ॐ नमः श्रीमहात्रिपुरसुन्दर्यै अथ सहस्रनाम लिख्यते श्रीदेव्युवाच ॐ भगवन्भाषिताशेषविशेषकरुणानिधे देव्यास्त्रिपुरसुन्दर्याः मंत्रनामसहस्रकम् श्रुत्वा धारयितुं देव ममेच्छा वर्ततेऽधुना । कृपया केवलं नाथ तन्ममाख्यातुमर्हसि श्रीशंकर उवाच ॐ मंत्रनामसहस्रं ते कथयामि वरानने गोपनीयं प्रयत्नेन यथा नानिस्सम देश्वरि ॐ अस्य श्रीमहात्रिपुरसुन्दरी सहस्रनामस्तवराजस्य श्रीमहादेव ऋषिः अनुष्टुप् छन्दः श्रीमहात्रिपुरसुन्दरी देवता ऐं बीजं सौः शक्तिः क्लीं कीलकम् मम श्रीधर्मार्थकाममोक्षार्थे सहस्रनामपाठे विनियोगः इति कृतांजलिः स्मरन्नामसेत् श्रीमहादेवऋषये नमः शिरसि अनुष्टुप्छन्दसे नमः मुखे श्रीमहात्रिपुरसुन्दरीदेवतायै न

मः हृदि ऐं बीजाय नमः गुह्ये सौः शक्तये नमः पादयोः क्लीं कीलकाय नमः नाभौ मम श्रीधर्मार्थकाममोक्षार्थे जपे विनियोगः सर्वाङ्गेषु इति ऋष्यादिन्यासः अथ करन्यासः ॐ प्रथमकूटं अङ्गुष्ठाभ्यां नमः ॐ द्वितीयकूटं तर्जनीभ्यां स्वाहा ॐ तृतीयकूटं मध्यमाभ्यां वषट् ॐ प्रथमकूटं अनामिकाभ्यां हुं ॐ द्वितीयकूटं कनिष्ठिकाभ्यां वौषट् ॐ तृतीयकूटं करतलकरपृष्ठाभ्यां फट् इति करन्यासः अथ षडङ्गन्यासः ॐ प्रथमकूटं हृदयाय नमः ॐ द्वितीयकूटं शिरसे स्वाहा ॐ तृतीयकूटं शिखायै वषट् ॐ प्रथमकूटं कवचाय हुं ॐ द्वितीयकूटं नेत्रत्रयाय वौषट् ॐ तृतीयकूटं अस्त्राय फट् इति षडङ्गन्यासः अथ ध्यानं ॐ आधारे तरुणार्कबिंबसदृशं बीजं च वाग्भवं बीजं मन्मथमिन्द्रगोपसदृशं हृ

त्पंकजे संस्थितम् चक्रे भालमध्येश
शांकरुचिरं बीजं च तन्नीयकं ये ध्याय
न्ति पदत्रयं तत्र शिवे ते यान्तिम् इति स्वहृ
त्कमले श्रीदेवीं ध्यात्वा पाठं कुर्याद्यथा
ॐ सुभगा सुन्दरी सौम्या सुषुम्णा सुप्रभा मा
वती मनोज्ञा सुस्वरा सुरम्या शोभना ललि
ता शिवा कान्ता कान्तिमती कामा रती रा
मा मनोहरा कल्याणी सुभगा हृद्या पेश
ला हृदयंगमा सुभद्रा रमणी दक्षा साध्वी
शार्वी सुमंगला वामाभिन्नावनी भव्या
कमनीयातिकोमला शोभातिरूपा मधु
रा रमा मेया रतिप्रिया सुरसाह्लादिनी।
सीता चंद्रसौन्दर्या सुशीतला मनोन्मनी
महामाया मातंगी मदिरात्मिका महाल
क्ष्मीर्महाशक्तिर्महादेवस्वरूपिणी माहे।
श्वरी महानन्दा महानंदविधायिनी मानि
नी माधवी माध्वी मदरूपा मदोत्कटा आनं
दकंदा विजया विश्वेशी विश्वरूपिणी। सुप्र

माकौमुदी कांता बिंदु नादस्वरूपिणी का-
मेशी कामकलिनी कामदा कामवर्धि-
नी भूरुंडा चंडिका चंडी चामुंडा मुंडमालि-
नी अणुरूपा महारूपा भूतेशी भुवने-
श्वरी चित्रा विचित्रा चित्रांगी हेमगर्भा कु-
लेश्वरी चैतन्यरूपिणी नित्यानित्या नि-
त्यासनातनी ह्रीकारी कुंडली धात्री धरि-
त्री देवसंभवः उन्मादिनी महारात्री सर्व-
मन्त्राक्षरार्चिता परमानंदनिस्पंदा पर-
मार्थस्वरूपिणी योगेश्वरी योगरूपा हं-
सिनी परहंसिनी कलाकलावती रक्ता
लक्षणा वर्त्मचारिणी करंध्रनिलया हृ-
त्पद्मव्योमपद्मनिवासिनी ज्वालांशुमा-
लिनी माया वरेण्या वरदा वरा विद्रुमाच
विशालाक्षी विशिष्टा विश्वनायिका चं-
द्रवंद्या विश्ववंद्या विश्वा विश्वविभाविनी
विश्वयोनी विश्वशिवा विश्वाराध्यापि-
कस्वरा मदक्लिन्ना मदोद्भिन्ना मानिनी

त्रि॰
स॰
३

3

मानवर्धिनी मादिनी मोदिनी मायाम
दावासा महाश्रया मदनिच्छादिनी मा
यामदिरालीमदालसा मदात्मिकाम
दाशामविंदुकृन्ताधरा मूलमूलाममहामू
लामूलाधारसुरूपिणी सिंदूररक्तारक्ता
गीत्रिनेत्रात्रिगुणात्मिका वासनावासम
यीवाणीवारुणीविद्या अरुणारुणा
भासाभाविनीवह्निवासिनी सिद्धासि
द्धेश्वरीसिद्धिः सिद्धांवा सिद्धमातृका सि
द्धार्चिता सिद्धिविद्या सिद्धिदा सिद्धसंमता
वागभवावाग्भवा विद्या वाङ्मयी वादिनी
वदा त्वरिता सत्वरा तथ्या त्वरयित्री त्वरा
त्मिका अमला कमला कामा सकला स
र्वमंगला भगोदरी भगक्लिन्ना भगिनी भ
गमालिनी भगप्रदा भगानंदा भगेशी भ
गनायिका भगात्मिका भगावासा भगि
नी भगशीतला भगावहा भगाराध्या भ
गाढ्या भगवाहिनी भगनिष्यंदिनी र्भगी

भगाभगाभगावर्धिनी भगाविर्भगाभो-
गांकाभगाभेद्याभगोत्कटा भगमाला।
भगाक्रूराभगात्रुताभगेश्वरी भगरेखा
भगोद्भागाभगायोनिर्भगालया भग-
मालाभगासाराभगाभेदाभगालसा
भगाविंबामदाक्लिन्नानित्यक्लिन्नामद
द्रवा सकलानिष्कलाकालीकंकाली
कलभाषिणी कौलिकीकमलाकाली
कमलाकमलावती भास्वराभासिनी
भास्वद्भद्रकालीकुलांगना गीर्वाणीगी
ष्पतिगौरीगिरीशागिरिसंभवा रसा
त्मिकारसासारारससंदोहरसावहा कां
तिनिष्पंदिनीकाम्याकामिनीकामव
र्षिणी विद्याविद्यात्रीविविद्याविद्यास्या-
विद्याविद्या सर्वांगसुंदरीसर्वलावण्या
शारंबरा चतुरंगीचतुर्बाहाचतुराचारु
हासिनी महामंत्रोमंत्रमयीमणिपूर-
समाश्रया मंत्रात्मिकामंत्रमातामंत्रग

त्रि· स· ४

५

ण्यासंमर्दिणी पुष्पबाणा पुष्पविलासु·
ष्मिणी पुष्पवर्षिणी इक्षुचापा महापाशा
स्रमहाप्रियदायिनी सर्वदा सर्वजननी
सर्वाद्या सर्वरंजनी सर्वसिद्धिमहोपाया
सर्वयोगप्रसाधनी महारुद्रा च माहंद्रीस
र्वज्ञा सर्वपायिनी आत्मविद्या महाविद्या
ब्रह्मविद्या यशस्विनी विश्वेश्वरी शिवा·
राध्या शिवनाथा शिवात्मिका अनाहता
ब्जनिलया निर्भरा निर्वृतिः परा निर्वाणरू
पिणी नित्या निर्मला निष्कलप्रदा श्रीफ
ला शिवदा शिष्या श्रीमध्यीशिवरूपिणी
इक्षुचापा महाबाणा पाशांकुशधरा नव्या
परा कुलीना निष्कुञ्जा कुटिला कुटिलालका
महोदरा महारूपा महिमा महिता मही शि
वंकरी सत्स्वरूपा चिद्घना चिदथीश्वरी सूर्य
मंडलमध्यस्था त्रियाशांकरवल्लभा स्वर
भिस्वमना सूर्यास्वंभूणा सूर्यभूषणा स्व
यात्रवासुद्यासारास्त्ववसंविन्स्वरूपिणी

अनन्तासमस्तकल्याणसम्पत्सिद्धिमेदि-
नी इच्छाशक्तिर्ज्ञानशक्तिः क्रियाशक्तिः
श्रियंकरी नित्यानित्यानंदा सूक्ष्मज्ञा-
नस्वरूपिणी स्वरलाक्षरसासारासारा-
गम्या सरस्वती परापरायणा पश्या परा
निष्ठापरायणा श्रीकरी श्रीमती श्यामा-
मा शिवयोनिः स्वलक्षणा निरानंदा निरा-
लंबा निर्द्वंद्वा निर्गुणात्मिका बृहती बृह-
णी ब्राह्मी ब्रह्माणी ब्रह्मवादिनी धृतिः
स्थितिर्मतिर्मेधा श्रद्धा पुष्टिः श्रुतिः स्मृतिः
सदानंदा सुसंबोधा सर्वसौभाग्यवर्धिनी
निवर्तका निराकारा राजंभाणी स्तंभनी रतिः
भोगदा कमला रौद्री द्राविणी क्षोभिणी त-
था कुंडेशी कुलमध्यस्था मध्यनाडीगति-
प्रिया कुलोत्तीर्णा कुलानंदा मेधा वाग्वा-
दिनी सती उमा प्रियव्रता लक्ष्मी रकुलाकु-
लदीपिनी विश्वात्मिका विश्वयोनिर्विश्व-
सत्त्वा विनायका आपनानादिनी तीर्था-

त्रि॰
स॰
५

5

शाकिनीमांसशालिनी सर्वमंत्ररूपिणी।
हृष्टा स्वहृष्टा शंभुशंकरी संदर्शिनी ह
रावासारसंवयासेश्वरी सर्ववर्णावर्णा॰
सत्कोतिरवर्णावर्णारूपिणी ललितांगी
वरिष्ठा श्रीरस्पंदा स्पंदरूपिणी शांभवा
नंदिनी नंदानंदा नंदरूपिणी निर्वाण
सौरभा दुर्गा महिषासुरमर्दिनी विश्वरू॰
पा विश्वरूपा विविधार्थाभिधायिनी ज
यिनी विश्वजननी विश्वनिष्ठा विलासिनी
भ्रूमध्यनिलया निष्ठा निर्गुणा गुणावर्द्धि
नी हृल्लेखा भुवनेशानी भुवना भुवनात्मि
का विभूतिर्भूतिरभूतिः संभूतिर्भूतिका
रिणी ईशानी शाश्वती शैवी शर्वाणी श
र्मदायिनी भवानी भाविनी भासा भास्विनी
भूतभाविनी हृत्पद्ममध्यनिलया स्वरोत्म
नासरात्मिका अर्केंदुरूपा बिंदुस्ता बिंदुबिं
दुविभूषिता प्रज्ञा प्रज्ञावती पूर्णा स्वाधि
ष्ठानसमाश्रया सूक्ष्मरूपा परानंदा सूक्ष्म

न्मस्था चिन्मयी परा पूर्णानंदा महानं-
दा सदाघूर्णितलोचना शरण्यानतरक्षणी
कांता सदारक्ता तपस्विनी अनंतानंतम-
हिमा निश्चया प्राणनिरंजना अचिंत्याश-
क्तिः चिंत्यात्मा चिंत्या चिंत्यस्वरूपिणी खे-
चरी खेचरीमुद्रा खेचरीयोगरूपिणी
ज्ञानगम्या ज्ञानमूर्तिर्ज्ञानिनी ज्ञानरूपि-
णी जगन्मयी जगन्माता जगत्साराज-
गद्भवा आप्यायनी शिवानंदा कूटस्था-
मातृरूपिणी अमृतांशा स्वधाधारा स्व-
धाबिंदुसमाहृता मकरा मकराकारा
स्वधाधारा स्वधामयी दहना दहनीका-
शा दहनीकाशमध्यमा मंगल्या मंग-
लकरी महामंगलरूपिणी स्वप्रकाशा
सदाभासा भास्वरी स्फीतरूपिणी कास्या-
यनी कलावालापूर्णा कामा यशस्विनी
नादावसाननिलया नारायणमनोहरा
मोहमार्गविधानज्ञा विधिगुप्ता त्रिमू-

त्रि॰
सु॰
८

6

मिका अनुरागामात्तु रागामात्तु ष्मामात्तु
रतिक्रमा ऋद्धिदा कामदा सिद्धिज्ञानदा
मानदायिनी स्तुथाधारा स्तुथामोदा स्तुमे
धामदमंदिरा निर्वाणदायिनी श्रेष्ठा श
र्मिष्ठा शारदाश्रिता सर्वचैतन्यरागाख्या
शुद्धसत्वा निराश्रया स्तुतिः स्तुतिमयी॰
स्तुत्या स्तुतिरता स्तुतिप्रिया कामरूपा
कामकरी कालघ्नी कालरूपिणी ॐका
रगर्भी श्रीकारी कंकाली कालरूपिणी
विश्वपत्नी विश्वदार्थी विश्वसूः विश्ववंदिता
विश्ववेद्या विश्ववीरा विश्वघ्नी विश्वरूपिणी
शीललभ्या शीलवती शीलस्था शीलरू
पिणी उड्डियाणपीठकोर्धनालाकिनीरूपा॰
किनीप्रिया वेधनी वेधशालिकौले जनानि
जरूपिणी जालंधरी जगन्मूर्तिः जगत्सुरू
लरूपिणी शाकिनी शारदा संध्या सुकुली
णी सदाशिवा स्फुरंती स्फुरिताकारा॰
स्फुर्तिः स्फुरणरूपिणी शिवा स्तनी शिव

ष्मिष्टाशिवाज्ञाशिवरूपिणी शाकिणीर
मणीरामारञ्जनीरञ्जनीक्रिया विश्वंभरा
विधिश्रेष्टाविधात्रीविधिवल्लभा विधो:
ननीविचित्रार्थाविश्वास्याविश्ववंदिता
विश्वासकारिकाकेशपाविश्वाहंतिवि
चलणा विश्वयोनिर्महायोनिर्कर्मयो
निःप्रियंवदा हाकिनीहारिणीहास्या
रोहिणीरोगहारिणी श्रीसाराश्रीपदा:
श्रीश्रीःश्रीयरीश्रीकरीप्रिया श्रीमती
श्रीमयीश्रेष्टाश्रयणीयाशिवेश्वरी का
माश्रयाकामहूतीकामगिर्यालयाश्रिता
रुद्रात्मिकारुद्रनित्यारुद्रगम्यारजस्वला
ङंकारघोरुपांतस्थाभैरवीह्लादिनीप
र क्रूरदेहानुगानान्यास्वधाविंदुसमास्थि
ता काकिनीकमलावासापार्वतीपररू
पिणी मेघवर्णाघोरसुखीतपनीताप·
नीदिशा मकरामात्रवकेशीमहासेनवि
मोहिनी उत्तकाउत्तकाश्रेष्टाङ्गीका·

शीवक्रनायिका फेत्कारीरुद्रचामुंडाफें
त्कारीसौगतांबरा गारुडागारुडीजपेष्टा
स्वागता ब्रह्मचारिणी कृष्णांगवाहिनी
कृष्णाकौबेरीकमलप्रिया वेतेश्वरीचं
द्ररूपाप्रचंडाचंडमातृका कंकालपत्नी
कालिंदीकौमारीकामवल्लभा पानानु
रक्तापानस्था भीमरूपाभयापहा रक्ता
वेणस्वरानंदात्रिकोणपानदर्पिता महो
कुष्माकरूपीस्याकंकालकुलतर्पिता
सर्ववर्णासुवर्णाभापरामृतमहार्णवा
योमर्णावानागवृद्धिर्वीरमातानवात्मि
का द्वादशारसरोजस्थानिर्वाणसुखदा
यिनी आदिशक्तिर्द्वादशांताश्रीकंठाशं
तिमोहिनी परापराविशालाह्रीसी
मंतामेरुनायिका आकाशलिंगसंभू
तापंचामृतरसात्मिका शाश्वतीरुद्रसि
द्धार्थाकपालिकुलतर्पिता कामेश्वरी
योनिमुद्रात्रिखंडासिद्धवंदिता श्रीकंठ

पीठनिलया कौलमातंगमंडिता संवर्त
मंडलगता भुवनोद्यानवासिनी पादुका
क्रमसंतर्प्पिता भैरवाप्यपराजिता अवच्छं
तकुलानंदा दिव्यपानरसोत्सुका उद्या
नसंवासमयरा व्रह्मविष्णुसंतर्पिता उन्म
त्तहेलारसिका योगिनीशततर्पिता सं
तानानंदिनी वीजाद्यचक्रनेलोपकारिणि
खिचक्रनामका भासा परा विद्या विमोहि
नी शाकंभरी संभविश्री स्कंदनंदंतर्पि
ता हेमंकरी समाख्या सांसमीता विंदुमा
लिनी चर्चिताचर्चितपदा गारुविहंगग-
धारिणि अघोरामंत्रितपदा भवानी भ
वरूपिणी उमा संकर्षिणी धूमा धूमरी
नागिनी शिवा मूलमातुर्लेभाषाशास्त्री।
महाशास्त्री शिवंविडिनी योगलक्ष्मी राज
लक्ष्मी भोगलक्ष्मीः कपालिनी देवयोनि
महायोनिर्लिलिहानाद्यनेश्वरी वैज्ञानि
कामहारात्रिर्विलिनी केतुमालिनी महा

नेद्रामहाभद्रावह्निनी रक्तवर्णिणी संध्या
नंमध्यरात्रीब्रह्मग्रासिनीसर्वभक्षिणी। श्म
शानजिकाभयार्थीराशूलिनीमुंदरामदा
सपीठिकाकालहंतीदेवकार्यसमुत्थिणी
कुंभिणीशंखिणीगर्वीगाराह्रींफुंफउन्न
मिका उग्रात्मिकापद्मावतीधूर्जटीवक्र
धारिणी देवीनमरूपीशिखामंत्रिणीरू
पधारिणी यंत्रिणीस्फोटिनीस्फुलिः॥
शोषणीघोषणीसर्वी हुंकारिणीवाम
देवीखड्गिनीचंद्रनंदिनी क्लींकारीवन्म
लाप्रष्ट्रोमाकारामलहंसिनी वज्रिणी
दंष्ट्रिणीजैत्रीगोत्रविद्यामतीफवा प
रतेजोमयीसंविसर्पिणीपीठनिवासिनी रू
तिणीभीषणीवांडीप्रेतस्थानामतंगिनी
मनोन्मनीभीषणाचंप्रेतस्थाभीमभोगि
नी मनोन्मनीभीषणाचप्रेतस्थाचरि।
नीललिटिनीउच्छिष्टांगिनीनादिनीरजा
धारिणीकालरात्रिमेघमालासमाप्ति।

का विभवस्थामवद्रूपामहाश्रीर्धूम्रलो
चना मातंगपीठनिलया दशनीरोधनी
रुचिः सुगंधिसंधिनीवधूर्वधूशवंधा।
मोचिनी सावित्री सन्ततिः कीर्तिः दमा
रूपा महादया गणेश्वरी गणाकारा स
गणा गणपूजिता गोमयी गिरिजा सा
धीशर्वाणी सर्वमंगला एकाकिनी सि
द्धकन्या काष्ठा सूत्रस्वरूपिणी ब्रह्मरू
रूपिणी ब्रह्मयोगिनी मीनरूपिणी द
तादात्यिणी दत्ता दहना दहनांतरा
कृष्णागरिष्ठा धरणी धारिणी वसुधा।
मिनी वसुधा निर्वसुज्योतिर्वसुधाराव
सुप्रिया नर्मदा शर्मदा हृष्टा सरूपिणी ह
देवात्मिका तपनी तापनी दीक्षा शोधनी
शमवाहिनी स्वस्तिः स्वस्तिमती बाला।
कपिलावि‥वाहिनी विद्याधरी लोक
धात्री शिवसारस्वरूपिणी ……णनि।
लया आम्नाया त्रयी माता त्रयीतनुः त्रयीवि

त्रि॰
सु॰
८

१

यात्रि .... त्रिस्वरात्रिपुरांबिका त्रि
वर्णा त्रिपुरा श्री सा त्रिपुराघरवासिनी त्रि
पुराश्रीस्त्रिजननी त्रिभूस्त्रिपुरसुंदरीम्
कथितं तव देवेशि रहस्यं सर्वकामदम्
स्फुलिंगिनी अर्चिष्मती तिथिमयी का॰
लिनीदृष्टा पञ्चमीसर्वतोभ
द्रा त्रिस्था शक्तित्रयात्मिका त्रिकोणि॰
या त्रयी सारा त्रयीरूपा त्रिपुष्करा त्रिको॰
टरा त्रिविधा त्रिमूर्तिस्त्रि गुणेश्वरी त्रि
दिवा त्रिदिवेशानी त्रिस्था त्रिपुरसुंदरी
।... ॥ इति त्रिपुरसुंदर्या मंत्रनामसह
स्रकम् सर्वपापप्रशमनं सर्वतीर्थ॰
फलप्रदम् सर्वसंपत्करं देवि सर्वदारि
द्रनाशनम् सर्वसिद्धिप्रदं देवि सर्वसौ
भाग्यवर्धनम् एतेन स्तवतो देवि प्रज
पित्वा सहस्रमे सिद्धांति सकला स्तस्य
संपदः कामरूपिणः आयुष्यं वर्धते तस्य
विद्यालक्ष्मीस्तुष्टकलाः प्रभाते यः स्त

नित्यमिमां देवि मंत्रात्मिकं पठेत स शि-
वः स तु सर्वज्ञः सर्वदेवोत्तमोत्तमः ॥
इति श्रीरुद्रयामले तंत्रे उमामहेश्वर-
संवादे श्रीमहात्रिपुरसुंदरीनामस-
हस्रं संपूर्णम् ॥ शुभमस्तु ॥

त्रिं
स्तो १

ॐ श्रीगणेशाय नमः ॐ नमः श्रीमहात्रिपुरसुन्दर्यै अथ स्तोत्रम् भैरव उवाच ॐ शृणु नाथ प्रणदे देवि स्तोत्रं तत्त्वनिरूपणम् महात्रिपुरसुन्दर्याः सर्वसंसारमुत्तमम् यस्मै कस्मै न वक्तव्यं न द्रष्टव्यं कदाचन यस्मै कस्मै न दातव्यं विना शिष्याय धीमते ॐ अस्य श्रीमहात्रिपुरसुन्दरी स्तोत्रराजस्य श्रीदक्षिणामूर्तिः ऋषिः पंक्तिश्छन्दः श्रीमहात्रिपुरसुन्दरी देवता प्रथमकूटं बीजम् द्वितीयकूटं शक्तिः तृतीयकूटं कीलकम् श्रीधर्मार्थकाममोक्षार्थे स्तोत्रपाठे विनियोगः ॐ सूर्यकोटिसमाभासां चन्द्रकोटिसुशीतलाम् त्रिलोचनाम् पाशांकुशधनुर्बाणान् धारयन्तीं शिवां भजे इति ध्यात्वा ॐ श्रुभैव ह्यारूढमति युतमनस्सेष्ट फलदं सविघ्नं हर्तुं मे दोयदि जपति भक्तस्तवमिदम् न दातव्यं होणीवलयमसेशाधितपदो भवेज्जित्वैकाकी नृपजनशिखो

शेखरमणिः १ मूर्धस्थोदहननाथविधुखम
मलवामाक्षिणीसंयुतंसेंदुंसुंदरिविंदुमं
डितमर्णवंतःस्मरेत्साधकः मूकस्यापि
सुरेंद्रसिंधुजलवद्वाग्देवताभारतीस
द्यःपद्यमयीमुखात्प्रकटदेवेशिनिर्ग·
च्छति २ ककारार्णध्वांतात्परमपरमा
ज्ञाचितमजंसविंदुचंद्रार्धांकितमपमल
चंद्रास्ततमपयम् जपेद्योमंत्रेशंहृदय·
कमलेवीरजननित्वदीयंनिःशंकंपद
मवनिनाथःसलभते ३ वाग्भवंतवशि
वेहृदिवीजंध्यायतेयदिनरोचलचित्तः
तस्यतच्चरणपूजनमात्रात्तदासततंभज
तिमंदिरेरमा ४ शक्तिबीजमनघंसुधा
करंसाधकोयदिजपेद्धृदिमन्त्रा तस्य
देववनिताश्चरणाब्जौरंजयंतिमुकुटेर्म
णिभूतैः ५ ताराणमेकंमनुमध्यसं·
स्थयोध्यायतेसाधकचक्रवर्ती इंद्राग
नाकेलिविलासकारीपरत्रमुक्तःशतक

त्रि॰
स्तो॰
२

2

ल्पकोटि ६ मायावीजंयोजपेत्तेमहेशि॥
तवंमंत्रीभक्तिमान्मुक्तिकांक्षी त्वत्सह
स्रायातित्वद्धामरंभानाकस्त्रीभिर्वीज्य
मानःसुतालैः ७ लक्ष्मीवीजंसर्वमंत्रे
कतंत्वध्यायेत्मंत्रीनावकंविद्यमानः सु
क्लाभोगान्मातित्रैलोक्यराज्यंकृत्वास्था
नंनावकंसाधकेभ्यः ८ ककाराद्यंकू
टंभुवनविदितंतेजपतियोह्रदंतंमंदी
वात्रिदशजननिश्रद्धरपदे त्रिनेत्रोवि
ल्हवीकमलनयनःपंकजभवोभजे॥
दास्यंगेहेजननिसहसानस्यविद्धः
हकाराद्यंकूटंविदितमतिशुभंगुणपरं
गुणातीतंवर्णैर्हृदयरचितवीजंमनुमः
यम् जपेद्ध्यायेद्धृसेविभवमनिशंप्राप्य
सहसास्तरस्त्रीभिःसार्धंचरतिभवनेनं
दनवने ९ सकारादिकूटंचतत्वंवर्णा॥
साध्यंपरंयोजपेत्साधकोमानसेतु
शिवोविल्हरिंद्रोगिरिंचोमहेशित्वदी

येत्थत्वंभजेत्साधकंतम् शुत्वंणार्ण
साधकोंनजपेद्योवीजंतेजोवर्धनंस्तव
भाते सर्वांजित्वासाधकोवैरिसंघात्क
यीद्राज्ञ्यज नमजंमांतरेण ।२ वासनार्णं
मनिशंयदिस्मायेद्धिंतुमंत्रिनमस्साध्य
नात्मकम् वीरभूमिशयनेरिपुस्त्रिज्ञा
स्तान्विस्तभजतेयएामिमाम् ।३ का
मराजममरैतेकनिधानंयोजपेद्दिनशो
नवभूमे सार्वभौमपरिपालितोधरांधरा
रयेद्धिसहस्रातवभक्त्या ।४ मायावीजं
देविमंत्रांतसंस्थंरात्रौवह्निर्ध्यायतेसाध
कोयः भूमौभूपास्तस्यपादाब्जयुग्मंरंजंति
स्वैर्मौलिरत्नांशुवर्गैः ।५ त्वन्मंत्रांतगतंत्र
यार्णमचलंपीयूषधाराधरंतत्त्वंतत्त्वम
तेद्वितोजपतियोवीजंशिवेतावकम् व
ण्यपारस्यथराधरेश्वरसुतेगीर्वाणवामज्ञ
वःरम्यश्लाघिमनोज्ञैःकविवरैःस्तुतिःन
सेव्योन्तेपैः ।६ श्रीसुन्दरीस्तववरंपठतेज

त्रि॰
स्तो॰
२

पंचांगश्रीमंत्रराजनिलयंपविभवैकहेतुम ३
ष्टप्रदानसमयेबहुकल्पवृक्षं शीघ्रंप्रयाः
तित्रिदिवंमनसोविशिष्टः १७ इतीदंपरम
तत्वंमंगभूतंहितंपंचममम महात्रिपुरसुंद
र्याः स्तवराजस्तवोत्तमम १८ इदंपंचांग
मनिशं सुंदर्याःसारमुत्तमम गोप्यगुप्तत
रंगुह्यंगोपनीयंप्रयत्नतः १९ सदागुप्तंस
दागोप्यंगोप्तव्यंपशुसंकटे रांडदेयंपिशु
नेदेयंनदेयाणेशवादिने २० गुप्तमंत्तत
रंचगोपनीयंस्वयोनिवत अभक्तेभ्यो
पिपुत्रेभ्योदत्वानरकमाप्नुयात २१ विना
शिष्यायनोदद्यात्साधकायशेण्यगोपयेत
दुर्जनेभ्यःसदागोप्यंगुप्तंवशरजन्मनः
२२ सर्वथागोपयेन्नित्यमित्याज्ञापारमे
श्वरी २३ इतिश्रीरुद्रयामलेतंत्रेश्री
महात्रिपुरसुंदरीपंचांगभूतस्तव
राजःसमाप्तः शुभंमस्तुसर्वजगतां

स्तो॰ १

ॐ श्रीगणेशाय नमः ॐ नमो भगवते सदा
शिवाय श्रीदेव्यै नमः ॐ कल्याणवृष्टि
भिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमं
गलदीपिकाभिः सेवाभिरंब तव पादस
रोजमूले नाकारि किं मनसि भक्तिमतां
जनानाम् १ एतावदेव जननि स्पृहणी
यमास्ते त्वद्वंदनासु सलिलस्थगितेपि ने
त्रे सान्निध्यमुद्यदरुणायुतसुंदरस्य त्व
द्विग्रहस्य परया सुधयाप्लुतस्य २ ईशित्व
भावकलुषाः कति नाम संति ब्रह्मादयः प्र
तियुगं प्रलयाभिभूताः एकः स एव जननि
स्थिरसिद्धिरास्ते यः पादयोस्तव सकृत्प्रण
तिं करोति ३ लब्ध्वा सकृत् त्रिपुरसुंदरि ता
वकीनं कारुण्यकंदलितकांतिभरं कटा
क्षम् कंदर्पभावसुभगाः केवलभक्तिभाजः
संमोहयंति तरुणीर्भुवनत्रयेपि ४ ह्रीं
कारमेव तव नाम गृणंति वेदा मातस्त्रिको
णनिलये त्रिपुरे त्रिनेत्रे संस्मरणयमभ

ट्टादिमध्यंविहायनंदंतिनंदनवनेसहलो
कपालैः ५ हंतेभ्रूणामरिगणीलपरिगी
र्णमानःशक्तःकथंनभवितागरलस्यवे
गः नाम्बासमनाययदिमानरिंदनवार्थं
देहस्यशाश्वदमृतप्लवशीतलस्य ६ स
र्वज्ञतांसदसिवाक्पटुतांप्रसूतेदेवित्वदं
घ्रिसरसीरुहयोःप्रणामः किंचित्स्फुर
न्मुकुटमुज्ज्वलमातपत्रंद्वेचामरेवमह
तीवसुधांददाति ७ कल्पद्रुमैरभिमत
प्रतिपादनेषुकारुण्यवारिभिरंबांवव
त्कटाक्षैः आलोकयत्रिपुरसुंदरिमा
मनाथंत्वय्येवभक्तिभरितंत्वयिदत्त
दृष्टिम् ८ हंतेतरेष्वपिमनांसिनिधा
यचान्येभक्तिंभजंतिकिलपामरदैवते
षु त्वामेवदेविमनसाहमनुस्मरामित्वा
मेवनौमिजननीशरणंत्वमेव ९ ल
क्ष्मीषुसत्स्वपितवांबविलोकितानामा
लोकयत्रिपुरसुंदरिमांकथंचित् नूनं

श्लो· २

मयान्नमदृशः करूणैकपात्रं ज्ञानोज्ञनि
च्छतिजनो घनज्ञायतेवा ११ ह्रीं ह्रीं मि·
तिप्रतिपदं जपतांतवाख्यांकिंनामदुर्ल
भमिहत्रिपुराधिवासे मालाकिरीटम
दवारणमाननीया तान्सेवतेवसुमती
स्वयमेवलक्ष्मीः १२ सम्पकराणिसक
लेंद्रियनंदनानिसाम्राज्यदानकुशलानि
सरोरुहाक्षि त्वद्वंदनानिदुरिताहर
णोद्यतानिमामेवमातरनिशंकलयं
तुनान्यम् १३ कल्पोपसंहृतिषुक
ल्पितताण्डवस्यदेवस्यखण्डपरशोःपर
शोःपरभैरवस्य पाशांकुशैक्षवशरा
सनपुष्पबाणासासाक्षिणीविजयते
तवमूर्तिरेका १४ लक्ष्मीमदाभवतुमा
तरिंदव दीधतेजःपरंवरुलकुंकुमपं
कशोभिः भास्वत्किरीटममृतांशुकक
लावतंसंमध्येत्रिकोणमुदितंपरमा
मृतंयत १५ ह्रींकारमेवतवनामत

देव रूपं तन्नाम सुन्दरि सरोजनिवास-
शीले यत्तेजसा परिणतिं वियदादिभू-
तं संपतन्नोति सरसीरुहसंभवादिः ॥१९
ह्रींकारत्रयसंपुटेन महता संदीपितं भ-
क्तितः स्तोत्रं यः प्रतिवासरं तव पुरो मा-
तः पठेन्मन्त्रवित् तस्य क्षोणिभुजो भवं-
ति वशगा लक्ष्मीश्चिरस्थायिनी वाणी
निर्भरसूक्तिसारभरिता जागर्ति दीर्घं
वयः ॥१९ इति श्रीशंकराचार्यविरचितं
श्रीमहात्रिपुरसुन्दरीस्तोत्रं संपूर्णम्

पा॰
१॰
१

ॐ श्रीगणेशाय नमः ॐ नमो भवान्यै ॐ
भगवतीभगवत्पदपंकजं भ्रमरभूतसु-
रासुरसेवितम् सुजनमानसहंसपरि-
ष्कृतं कमलयामलयानिभृतं भजे ता
नु भावयितुं वन्देहं विघ्नेशकुलदेवते न
रनागगणनात्मैको नरसिंहान मोपरः
हरिहरगुरुपादाम्बुपद्मेनुरागादधि
गतपरभागः सन्निधायादरेण नदन्त
वरकरोमि प्रीतये भक्तिभाजां भगवति
पदपद्मे पद्यपुष्पांजलिं ते २ केनैते र
चिताः कुतो न निहिताः सुम्भादयो दुर्मदाः
केनैते वत पालिता इति हितं तत्प्रेक्षिमा
वक्ष्महे ब्रह्माद्या अपि शंकिताः स्वविष
येयस्याः प्रसादावधि प्रीतास्तामहिषा-
सुरप्रमथिनीं भिन्नयादवयानिमे ४ पा
तश्री स्तवतभुंजा किमुत्वत्तवाङ्मैरो
जाभुजान्यन्नेष्टादशयाहिकारणागुणाः
कार्याग्रणारंभकाः सम्पदिकातिदंतिसं

२

ऽष्टभुजमहं भुः सर्वभूस्वमूर्ध्नि मे कथं प्रति
पत्तये किमथवापान्तदशाष्टौ दिशः ५
श्रीमाष्टादश समितेषु युगपदीप्तेषु दा
नवं राशस्त्रास्तं वा भयतो विभर्षि भगवत्यः
ष्टादशैतान्भुजान् वद्धाष्टान्दशयाव
न्तस्तु विभृतः कालीसरस्वत्योर्मीलि
तैकसिद्धानयोः प्रथयितुं साम्प्रतमेरत्न
माम् ६ अयि गिरिनन्दिनि नन्दितमेदि
नि विश्वविनोदिनि नन्दिनुते गिरिवर
विन्ध्यशिरोऽधिनिवासिनि शंभुविला
सिनि विष्णुनुते भगवति हे शितिकंठकु
टुंबिनि भूरिकुटुंबिनि भूतिकृते जयज
य हे महिषासुरमर्दिनि रम्यकपर्दिनि शै
लसुते १ सुरवरवर्षिणि दुर्धरधर्षिणि
दुर्मुखमर्षिणि हर्षरते त्रिभुवनपोषिणि
शंकरतोषिणि कल्मषमोषिणि घोषर
ते दनुजनिरोषिणि दुर्मदशोषिणि मन
नपोषिणि सिंधुसुते जयजय हे महिषा

प· पृ· २

2

सुरमर्दिनि रम्यकपर्दिनि शैलसुते ८ अ
यि जगदंबकदंबवनप्रियवासिनि वासि
निवासरते शिखरिशिरोमणितुंगहिमा
लयशृंगनिजालयमध्यगते मधुमधु
रे मधुदानवगंजिनि कैटभगंजनि रास
रते जय जय हे महिषासुरमर्दिनि रम्य
कपर्दिनि शैलसुते ९ अयि निजहुंकृ
तिमात्रनिराकृतधूम्रविलोचनधूम्रश
ते समरविशोषितशोणितबीजसमु
द्भवशोणितबीजलते शिवशिवशुंभ
निशुंभमहाहवतर्पितभूतपिशाचर
ते जय जय हे महिषासुरमर्दिनि रम्य
कपर्दिनि शैलसुते १० अयि शतखण्डवि
खण्डितरुण्डवितुण्डितशुण्डगजाधिपते
रिपुगजगंडविदारणचंडपराक्रमशौ
ण्डमृगाधिपते निजभुजदण्डनिपाति
तचण्डमहाबलचण्डभटाधिपते जय ज
य हे महिषासुरमर्दिनि रम्यकपर्दिनि शै

लसुते ॥ ११ धनुरनुषंगरणक्षणसंगप
रिस्फुरदंगनटत्कटके कनकपिशंग
पृषत्कनिषंगरसद्भटशृंगहताव
टुके कृतचतुरंगबलक्षितिरंगघटद्बहु
रंगरटद्बटुके जयजयहे महिषासु
रमर्दिनि रम्यकपर्दिनि शैलसुते १२
अयि रणदुर्मदशत्रुवधोद्धुरदुर्धरनिर्ज
रशक्तिभृते चतुरविचारधुरीणमहाश
यदूतकृतप्रमथाधिपते दुरितदुरीह
दुराशयदुर्मतिदानवदूतकृतांतमते ज
यजयहे महिषासुरमर्दिनि रम्यकप
र्दिनि शैलसुते १३ अयि शरणागत
वैरिवधूवरवीरवराभयदायकरे त्रिभु
वनमस्तकशूलविरोधिशिरोधिकृतामल
मलशूलकरे दुमदुमितामरदुन्दुभि
नादमहोमुखरीकृतदिङ्मकरे जयज
यहे महिषासुरमर्दिनि रम्यकपर्दिनि
शैलसुते १४ सुरललनाततथेयित

थेयितथ्याभिनयोत्तरनृत्यरते कृतकुकु
थकुकुथोगडदादिकतालकुतूहलगा
नरते धुधुकुटधुकुटधिंधिमितध्वनि
धीरमृदंगनिनादरते जयजयहे महि
षासुरमर्दिनि रम्यकपर्दिनि शैलसु
ते १५ जयजयजप्यजये जयशब्दपर
स्तुतितत्परविश्वनुते झणझणझिंझि
मकृतनूपुरसिंजितमोहितभूतप
ते नटितनटार्धनटीनटनायकनाटक
नाटितनाट्यरते जयजयहे महिषासु
रमर्दिनि रम्यकपर्दिनि शैलसुते १६
अयिसुमनःसुमनःसुमनःसुमनःसु
मनोरमकांतियुते श्रितरजनीरजनी
रजनीरजनीरजनीकरवक्त्रवृते सुन
यनविभ्रमरभ्रमरभ्रमरभ्रमरभ्रमरा
धिपते जयजयहे महिषासुरमर्दिनि
रम्यकपर्दिनि शैलसुते १७ महित
महाहवमल्लमतल्लिकवल्लितरल्लक

मल्लरते विरचितवल्लिकपल्लिकमल्लि
कमल्लिकमल्लिकवर्गवृते शितिकृत
फुल्लसमुल्लसितारुणतल्लजपल्लव-
सल्ललिते जयजयहे महिषासुरम
र्दिनि रम्यकपर्दिनि शैलसुते ९ अ
विरलगण्डगलन्मदमेदुरमत्तमतंग
जराजसुते त्रिभुवनभूषणभूतक-
लानिधिरूपपयोनिधिराजसुते अयि
सुदतीजनलालसमानसमोहनमन
मथराजसुते जयजयहे महिषासुर
मर्दिनि रम्यकपर्दिनि शैलसुते ९
कमलदलामलकोमलकांतिकला
कलितामलभालतले सकलविला
सकलानिलयक्रमकेलिचलत्कलहं
सकुले अलिकुलसंकुलकुन्तलमंडल
मौलिमिलद्बकुलालिकुले जयजयहे
महिषासुरमर्दिनि रम्यकपर्दिनि शै-
लसुते २ कलमुरलीरववीजितकू

१.
१.
४

जितलज्जितकोकिलमंजुमते मिलित
पुलिंद्रमनोहररंजितशैलनिकुञ्जगते
निजगुणभूतमहाशबरीगणरंगनसं
भृतकेलितते जयजयहे महिषासुर
मर्दिनि रम्यकपर्दिनि शैलसुते २१ क
टितटपीतदुकूलविचित्रमयूखतिरस्कृ
तचंद्ररुचे प्रणतसुरासुरमौलिमणि
स्फुरदंशुलसन्नखचंद्ररुचे जितकना
काचलमौलिपदोर्जितनिर्जरकुंजरकु
म्भकुचे जयजयहे महिषासुरमर्दिनि र
म्यकपर्दिनि शैलसुते २२ विजितसह
स्रकरैकसहस्रकरैकसहस्रकरैक
नुते कृतसुरतारकसंगरतारकसंगर
तारकसंगरतारकसूनुसुते सुरथसमा
धिसमानसमाधिसमानसमाधिसुजा
तरते जयजयहे महिषासुरमर्दिनि र
म्यकपर्दिनि शैलसुते २३ पदकमलं
करुणानिलयेवरिवस्यतियोनुदिनं स

शिवे अयिकमलेकमलानिलयेकम-
लानिलयःसकथंनभवेत् तवपदमेव-
परंपदमस्त्विति शीलयतोमम किंनशि
वे जयजयहेमहिषासुरमर्दिनिरम्य
कपर्दिनिशैलसुते २४ कनकलस
त्कलशीकजलैरनुषिंचति तेंगनरंग
भुवं भजति स किंनशचीकुचकुंभतटी
परिरंभसुखानुभवं तवचरणंशरणं।
करवाणिनतामरवाणिनिवासिशि
वं जयजयहेमहिषासुरमर्दिनिरम्य
कपर्दिनिशैलसुते २५ तवविमलें
दुकलंवदनेंदुमलंकलयन्ननुकूल-
यते किमुपुरुहूतपुरींदुमुखीसुमु
खीभिरसौविमुखीक्रियते ममनम
तंशिवमानधनेभवतीकृपयाकिमु-
नक्रियते जयजयहेमहिषासुरमर्दि
निरम्यकपर्दिनिशैलसुते २६ अयि
मयिदीनदयालतयाकृपयैवत्वयाभ

प॰ पु॰ ५

वितथमुमे अथजगतोजननीकृपया
सियद्यासितथाउमितासिरमे यउवि
नमत्रभवस्मरशीकृरुतामममंयकुरुता
पमयाकुरुमे जयजयहेमहिषासुरा॰
मर्दिनिरम्यकपर्दिनिशैलसुते २७ स्तु
तिमितःस्तिमितःसुसमाधिनानियमि
तोउदिंनवपटेनसदा परमयारमया
सनिषेवितेपरिजनोरिजनोपिचतंभजे
त २८ रमयतिकिलकर्षसेवचितंनरा
णांवनजननियमाद्रामकुसुमःकवी
नाम् अकृतसुकृतराणांपरम्यापयेकरु
षंस्तवनमवनमवनहेतुप्रीतयेविश्व
मातः २९ इतीउस्सरम्योहितेनोविंउग
म्योगुरुर्वेन्युरुघोयतःसाधुवेद्यः ततः
श्रीपतेःसूनुनाकारिसन्सूननाविश्व॰
मातःपदेपद्यपुष्पांजलिः ३॰ इतिश्रीप
तिसूनुरामकुसुमकविकृतभगवतीपद्य
पुष्पांजलिःसमाप्ताः संपूर्णमस्तुभं

ॐ श्रीगणेशाय नमः ॐ नमः सरस्वत्यै
ॐ नमो भगवते महाशिवाय ॐ हरिहरवं
कञ्जयोनिसमर्चितपादद्वये विजये क
तमहिषासुरदर्पनिवारणतत्परल
व्यजये भगवति देवि महाभयनाशि
नि निर्मलभक्तिपरे जयजय देवि ममा
मृतवर्षिणि दर्शनमेहि परे १ सकल
चराचरविश्वकृतस्थितिसर्गमहाप्रल
ये मनुजसुरासुरकिन्नरसिद्धसुरेन्द्र
कृपानिलये दितिसुतसंभवनिःसंभवा
णाष्ठलनिर्मलजीवलये जयजय देवि
ममामृतवर्षिणि दर्शनमेहि परे २ प
रमसमाधिपरायणसज्जनलुब्धकहृत्पात
रगे भवमलकर्दममग्नशरीरसमुद्धर
णोद्यमगे स्वयमनिरुद्धभुजङ्गमपाश
निकृन्तननिर्दयत्वे जयजय देविममामृ
तवर्षिणि दर्शनमेहि परे ३ अमृतक
शोदरि देवि वितथ्यापरिपूर्णशरीरधरे रि

गा

पुरुरुदानववेदेहविनिर्गतरक्तनिपानक
रे वसुदशराक्रुविलयग्रजंगमकंक
णकान्तियरे जयजयदेविममामृतव
र्षिणिदर्शनमेहियरे ४ उपवनको
किलषट्पदनिःस्वनमञ्जुलसद्यवने
स्वगतमतेर्भवतारिणि दुःखविनिवारि
णिसाधुजने स्मितकरपंकजवन्धुकु
ताशनमूर्तिकचन्द्रयने जयजयदेवि
ममामृतवर्षिणिदर्शनमेहियरे ५
श्रुतमसुरासुरयागविमोहितमोदि
तमुग्धहरे नवनवतामृतवंबरचरि
तसर्वविरिञ्चिपुरे जननिचसत्तुरुव
कनिवासिनिचित्रचरित्रयरे जयजय
देविममामृतवर्षिणिदर्शनमेहिय
रे ६ अविरतपीठचलत्त्रयवासिनिमा
तृगणैःसहिते हृदयपथाञ्जनभोग
तनिर्मलवासवचापलते अमितसि
ताहणनीलहरिद्रसमाश्रितरूपशते

जयजयदेविममामृतवर्षिणिदरशन
मेहिपरे ७ त्रिभुवनमोहिनिकालक
ंकिलिवामनयेविततेदिनकरको
टिशतप्रविभासिनिभारतवर्षमते
अनिहितकुण्डलिनीकुहरोमितनिश्च
लधूमलेते जयजयदेविममामृतव
र्षिणिदरशनमेहिपरे ८ प्रमथितः
सेन्द्रमुनीन्द्रसुरैरचविशांपतिद्रम
वे भुविमधुकैटभदानवमांससम
हिणिघोरमुखे अभिनवनिर्मलका
न्तिपरानतपापहरेपरमे जयजयदे
विममामृतवर्षिणिदरशनमेहिपरे ९
भगवतिपञ्चमुखेविष्णुरिरुद्रमुखोसन
गेममये अकृतकवेदचतुष्टयमातरि
देवसमेहृदये त्रिजगतिनित्यमनुग्रह
दायिनिसाधुजनेसुभगे जयजयदे
विममामृतवर्षिणिदरशनमेहिपरे १०
इतिश्रीस्कन्दपुराणेविल्हणाकृतंदेवी

गाथादशकं समाप्तम् संपूर्णम्

त्रि॰
म॰
१

ॐ श्रीगणाधिपतये नमः नमः शिवाय
श्रीरस्तु सदाशिवाय ॐ प्रातः श्रीत्रिपु
रे परात्परतरे देवि त्रिलोकीमहा ऐंद
राणि वमथ्यनोद्भवस्तथाप्यात्तुर्यवर्णो
ज्वलम् ३ यद्धातुसहस्रनूतनजपापु
ष्पप्रभं ते वपुः स्वांते मे स्फुरतु त्रिलोक
तिलकं ज्योतिर्मयं वाङ्मयम् १ आदि
क्षान्तसमस्तवर्णसुमणिप्रोते वितान
प्रभे ब्रह्मादिप्रतिमाभिकीलितषडस्रा
धाराब्जकलोन्नते ब्रह्माण्डाब्जमहासने
जननि ते मूर्तिं भजे चिन्मयीं सौषुम्णा
यतनपादपंकजमहामध्ये त्रिकोणस्थि
ताम् २ वन्दे वाग्भवमैन्दवात्मसदृशं
वेदादिविद्यागिरो भाषादेशसमुद्भवाः
पशुगतांश्छन्दांसि समस्वरान् कालांश्च
महाघनीस्तकटयस्तानस्मप्रसारेण
यत्क्लीजंपदवाकमानजनकं श्रीमा
तृके ते परम् ३ त्रैलोक्यस्फुटमंत्रतंत्र

महिमास्वात्मोत्थरूपंविनायबीजमव
ह्वारजालमखिलंनास्येवमानस्तव न
ज्ञाप्यस्मरणप्रसक्तस्वमतिःसर्वज्ञतांप्रा
प्यकःशम्भुब्रह्मनिवासभूतवदनेनेंद्रा
दिभिःस्पर्धते ४ मात्राषत्रविराजते
त्रिविष्पादत्तामहेश्यामातृकां शक्ति
कुंडलिनींचतुर्विधतनुंयस्तत्वविन्मस
ते स्वाविद्याखिलजन्मकर्मदुरितारण्य
प्रबोधाग्निनाभस्मीकृत्यविकल्पजाल
कमितोमातःपदंलब्ध्वजेत ५ त्वत्तेमा
यमबीजमेवकलयाम्यादिसवर्णाभि
क्रियाज्ञानेच्छादिसमस्तशक्तिविविधां
व्यक्तिंभजन्तिस्फुटम् उत्पत्तिस्थितिक
ल्पकल्पितन्तनुंस्वात्मप्रसारेणयत्का
म्यंब्रह्महरीश्वरादिविबुधैःकामक्रिया
योजितैः ६ कामेकारणतांगतस्तुगाणि
नेकार्येरतंतैर्महीसुखैःसर्वमनोगतैश्च
विविधैर्मानैरनेकैःस्फुटम् कामको।

यस्वात्मनैवसर्वतःशान्तोऽस्त्वविध्वंसकं
वीजंतियस्मैणोमितदंहंतेसाधुकामे
स्वरि। ७ यद्भक्त्याराजकामस्यरणेवणे
स्वात्मप्रभावंमहाज्ञाऊधांतविदारणे
कतरणिज्योतिःप्रबोधप्रदम् यद्देव
वर्णीयतेश्रुतिषुत्वंमात्रात्रयेणोमिति
श्रीविद्येतवसर्वराजवशकृद्बीकाम
राजंभजे ८ यन्नेदेवितनीयवीजमन
लज्वालावलीसन्निभंसर्वाधारतुरीय
शक्तिपरमब्रह्माभिधाशाङ्कितम् मूर्ध
स्थांतविसर्गभूषितमहौंकारात्मकंतत्
सदंसच्चिद्रूपमनमतत्वमहिमसांतेम
मद्योमतम् ९ सर्वंसर्वतएवसर्वसम
येकार्येद्रियाण्यंतरानततदिव्यमहाबीक
कर्मभिरिदंसमस्तंवंतःपर वागर्थ
व्यवहारकारणतन्तःशर्जगद्व्यापिनी
यद्वीजात्मकतांगतानवशिवेतन्नौमि
गीजंपरम् १० अंग्रीतुषुमणिप्रभंजन

परानीशंवरस्थायिनीशक्तिर्ब्रह्मलहरी
श्वासवमुखामर्शास्वरात्मस्थिता ह
ष्टस्थावरजंगमस्थितमहाचैतन्यमूः
र्णचयापयन्त्रीजन्ममरणेनैवभवतीश्च
उर्भवसंविके ॥ स्वात्मश्रीविजिता
नविस्मयचववल्लीपूरणैकव्रतंसद्विद्या
कविताविताललहरीकल्लोलिनीदीप
कम् बीजंयत्त्रिगुणप्रवृत्तिजनकंब्रह्मे
तियद्योगिनःशंसन्तिस्मरणसतेन।
दिहन्तेचित्तहृदयेश्रीपरम् ॥२ एकैकं
तवमातृकेपरतरंसंयोगिवायोगि
वाविद्यादिप्रकटप्रकाशजनकंजाड्या
पकारापहम् यन्निष्ठाश्चमरुतोमसंभा
सनमहाविसृप्रहर्षोदयोदेवाःस्वभ्र
विधिभुवंतनमहिमस्फूर्तिंदधत्योमि
ति ॥३ इत्थंत्रीण्यपिमूलवाग्भवमहा
श्रीकामराजस्फुरच्छक्त्याख्यानिचतुः
श्रुतिप्रकटितान्यस्फुटकूटानितेमू

नतैष्कृतिसंत्यक्तवर्णैर्विदितात्मा रक्तकां
तेशिवेयोजानातिसएवसर्वजगतांस्र
ष्टिस्थितिध्वंसकः १४ नित्यंयस्तवमा॰
त्रकाक्षरमथीसौभाग्यविद्यांजपेत्स॰
श्लाक्षरचक्रराजनिलयांसायंतनाग्नि
प्रभांकामाक्षित्वांशिवनामतत्वमभयं
मायात्मनासर्वतोदीप्यन्तीमिहतस्यसि
द्धिरचिरात्स्यात्तत्स्वरूपैकता १५ का॰
ध्येःपापवितैःकिमाद्यविडंबैर्होत्तुष्ट
मात्तैःपुनःकिंतैर्माकरणैर्विबोधितत
तयाविंबाविधानश्रिया एतैरेवनवाम
वीतिस्तुकविस्तावक्त्रवक्त्रवश्रीमतोः
यावत्तावदनुस्मरीसरीतिसरणिंपादाब्ज॰
योःपावनीम् १६ गेहंनाकतिगर्वितः
प्रणमतिस्त्रीसंगमोमोक्षतिद्वेषीमि
त्रतिपातकंस्तुकृततिक्ष्मावल्लभोदा
सति मत्स्यैर्वैयतिस्तबर्णास्तृणतिव
ल्पादंसेसेवनात्सांबदेभवभीतिभंजन

करीं गौरीं गिरीशप्रियाम् ७ अघोरा
ग्निरवीन्दुविंवनिलयैरंवत्रिलिंगात्मभि
र्मिश्रारक्तसितप्रभैरनुपमैस्तुभ्यमदे।
स्तैस्त्रिभिः स्वात्मोत्सादितकाललोक
निगमावस्थामरादित्रैधैरुद्भूतत्रिपुरे
तिनामकलयेयस्मैस्वधमोद्भयः ८
श्रीघोजाप्यतमर्थवाचकतयारूढः स्व
रःपंचमःसर्वोत्कृष्टतमर्थवाचकतया
वर्णःपवर्गान्तकः वक्त्रेणमहाविभू
तिमरणिःस्वाधारगौहाकृतो भूमध्यस्थि
तस्त्वतः प्रणवनस्तेगीयते चागमैः ९
गायत्रीसशिरास्तुरीयसहितासंध्याम
यीत्यागमैराख्यातात्रिपुरेत्वमेव महि
तांधर्मप्रदाकर्मिणाम् तत्तद्दर्शनमु
ख्यशक्तिरपिचत्वंब्रह्मकर्मेश्वरःकर्ता
र्हपुरुषोहरिश्चसविताबुद्धिःशिवस्त्व
गुरुः २० अन्नप्राणमनःप्रबोधपरमा
नंदैःशिरःपक्षपुच्छात्मप्रकटैर्महो

पनिषदां वाग्भिः प्रसिद्धीकृतैः कोशैः
पंचभिरेभिरंब भवतीमेतन्मुलीनामि
तिज्योतिः प्रज्वलदुज्ज्वलात्मचपलां यो
वेद सब्रह्मवित् २१ सच्चिन्मत्वमसीति वा
क्यविदितैरध्यात्मविद्याशिवब्रह्माभिर
न्नलप्रभावमहितैस्तत्वैस्त्रिभिः सद्गुरोः
त्वद्रूपस्य गुहारविंदविवरान्सप्राप्यदी
क्षामतो यस्त्वां विंदति तत्त्वतस्तदिदमिम
र्थेमत्कृत्कोभवेत् २२ सिद्धांतैर्वेदरूभिः प्र
माणगणितैरेभिरविद्यात्मसोऽनन्तदेवेशिव
सर्वं मय्यत्तमसंतानवन्न निर्भिद्यते यावत्ते
सविते वसंमतमिदं नोदेति विद्यातरेजं
त्तोर्जन्मविमोचनेकमितु रश्रीशांभवं।
श्रीशिवे २३ आत्मासौ सकलेंद्रियाश्र
यमनोबुद्ध्यादिभिः सूचितः कर्माबद्धत
नुर्जनिं च मरणं प्राप्नोति यत्कारणम् तत्ते
देवि महाविलासलहरी दिव्यानुध्यानं
जयस्तस्मात्त्वां गुरुमभ्युपेत्य सकलयेत्ता

मेवचेन्मुच्यते २४ नानायोनिसहस्र
संभववशाज्जाताजननम्यः कतिप्रयोता
जनकाः किंयतइतिमेचेतस्तिचाग्रेक
ति एतेषांगणनैववास्तिमहतः संसा
रपाथोनिधेर्भीतंमानितरामनन्यशर
णेरक्षानुकंपानिधे २५ देहद्रोभक
रैर्वतेर्वकुविधैर्दीनेश्च होमेजपैस्ना
नैईध्यमेयरुपैरमवैर्नानाविधैःक
र्मभिः यत्संकल्पविकल्पजालमिलि
तैः प्राप्यपदंतस्यतेदूरादेवनिवर्ततेपर
नरंमातः पदंनिर्मलम् २६ पंचाशल्लि
जदेहजान्तरभवैर्नानाविधैर्धातुभिः
वर्णैर्यैःपदवाक्यमानजनकैरर्थादि
नाभावितैः स्वाभिप्रायविदर्थकर्मज
फलैर्जातेरनंतैरिदंविश्वंव्याप्यविदा
त्मनाहमहमित्युज्जृंभसेमातृके २७
श्रीवक्रंप्रकृतिमूलकोशइतितेसंसार
चक्रात्मकंविख्यातंतदधिष्ठितंमरश्मि

त्रि॰ म॰ ५

वेश्मान्तर्मध्यसर्वतः पुनरमितमयान्तिक
काभिररुणां श्रीसुन्दरीभिर्वृतं मध्यबैन्दव
गसिंहपीठललिताब्रह्मविद्याधिवे २८
शान्ताशार्कसहस्रदीप्तमहस्सा सौन्दर्यसा
रैरलं लोकातीतमहोपमैरुपचिता स
र्वोपमागोचरैः नानारत्नविभूषणैर
लङ्कृते जाज्वल्यमानाभिधेयस्वमाना।
स्त्रिपुरसुन्दरि कुरु सान्निध्यनिवासं मम
२९ बिन्दुप्राणविसर्गजीवसहितं बिन्दु
त्रिजीवात्मकं यत्कूटानि विपर्ययान्निग
दितानाराधिकालावला पत्तैः संपुटितं
पुनस्त्रिविधिरेशा सादमन्त्रपरं गुह्यात्गुह्य
तमं सयोगजनितं सद्योगमोदप्रदं ३०
शिंजन्नूपुरपादकंकणमहामुद्रास्र
लालारसालंकारांकितमङ्घ्रिपङ्कजयु
गं श्रीपादुकालंकृतम् उद्यत्स्वर्णविच
त्रं विविधरुचिरं राजत्नपाशप्रभम् ब्रह्मा
दित्रिदशादरार्चितमिदं मूर्ध्नि स्मरान्यंव

ते ३१ आरक्तच्छविनातिमार्दवयुजा नि:
श्वासहार्येण सत्कौशेयेन विचित्ररत्न
चितैर्मुक्ताफलैरुज्ज्वलः कूजत्कांचन
किंकिणीभिरभितःसन्नद्धकांचीगु·
णेरादीमसृणनितंबबिंबमरुणंतेभा·
वयाम्यंबिके ३२ कस्तूरीघनसारकुं
कुमरजोगंधोत्कटैश्चंदनैरालिंतमा·
णिमालयातिरुचिरंग्रैवेयहारादिभिः
दीप्तंदिव्यविभूषणैर्जननि ते ज्योतिर्वि
भास्वत्कुचव्याजस्वर्णघटद्वयंहरिहर
ब्रह्मादिपीतंभजे ३३ मुक्तारत्नसुवर्ण
कांतिललितैस्तैर्वाकुवल्लीयुतैःकेयू
रोत्तमबाहुदंडलयैर्हस्तांगुलीभूषणैः
संसृष्टंकलयाभिहारमणिभिर्मुक्ताक
लापीकृतंग्रीवापरविभूषणेनसुभगं
कंबं च कंबुश्रियम् ३४ उद्यत्पूर्णकला
निधीशवदनंभक्तप्रसन्नंसदासंकु·
लांबुजपत्रकांतिसुषमाधिककार

त्रि·
म·
६
6

दक्षेक्षणम् स्मानन्दकृतमंदहासममस·
कृत्स्नाद्भवेत्कौतुकं कुंदाकारसुदंत·
पंक्तिशशिभाशुंशुसंस्माम्यविके ३५ त
मस्मणिकृतोरुकुंडलयुगंमाणिक्यमुक्ता
लसद्धीरावद्रुमनन्यत्वल्पमपरंहैमंच·
चक्रद्वयम् शुक्राकारनिकारदक्षममः
लंमुक्ताफलंसुंदरंविभ्रत्कर्णयुगंभ·
जामिललितंनासाग्रभागंशिवे ३६ ज्ञा
नीचरणकरुन्दकेसरमहागंधोद्भिरत्के
तकीनीपाशोकशिरीषमुख्यैरुत्सुमैः
प्रोतंसिताखूपिता श्रानीलांजनतत्प
मत्तमधुपश्रेणीववेणीतवः श्रीमातः
श्रयतांमदीयहृदयांभोजंसरोजालये
३७ लोलाम्बविचित्ररत्नखचितंहैमं
किरीटोत्तमंमुक्ताकांचनकिंकिणीग
णमहाहारप्रवालोज्वलम् वंचद्वृद्रक
लाकलापकलितंदेवद्रुपुष्पोल्लसन्मा
लैरंबविलंबितंशिखिवरंविभ्रच्छिरस्ते

भजे ३८ यं सारादिरसालयं त्रिभुवने मा
त्सैरन्तैस्सैर्युतं सर्वाङ्गीनरसं दशशाशास्त्र·
भिश्रीमत्कृपयार्पितम् तांबूलाहरणपल
वायरयुगं रम्यं त्रिपुरं दयद्भालं नन्द
नचन्दनेन जननिध्यायामि ते मङ्गलम् ३९
एवं यः स्मरति प्रसक्तस्वमतिः श्रीमत्स्व·
रूपं परं हृद्दोद्याणश्रुवामभवस्रुपमस्रो·
णामं नगायते सोऽपि स्पर्धति रक्ष्कृता·
खिलस्वरः श्रीज्रुंभितात्मालयः पृथ्वी
पालकिरीटकोटिवलिभिः प्रणार्चितां
घ्रिर्भवेत् ४· अयितवयतः पुंडेदाना·
त्प्रसादमयि युतित्रिभुवनवधूमोहज्यो
त्स्नाकलानिधिमंडलम् सकलजन·
निस्सारं संसारं गतः स्मरतां नरस्त्रिभुव·
नवधूमोहावोधिप्रपूर्णेविधुर्भवेत् ४०
प्रसूनशरपंचकं प्रकटजृंभमाणाशुष्कि
तं त्रिलोकमवलोकयच्चलचेतसाचिं
नयन् अशेषरमणीजनस्मरविजृंभ

त्रि॰
म॰
७

णेयः सदा पदं भवति ते शिवे त्रिजगदंगना
द्दो भजे ४२ पाशं प्रस्फुरितमहास्त्रमति
प्रकाशं घोरानवत्रिपुरसुन्दरि सुन्दरी^
णाम् आकर्षणे विलवशीकरणे प्र
वीणां चित्तं दधाति स जगत्त्रयवश्यकृ^
त्स्यात् ४३ यः स्वांते कलयति कोविद
स्त्रिलोकीस्तंभारंभणे भ्रमयस्तदारवी
र्यः मातस्ते विजयि महांकुशं स योगी दे
वांस्तंभयति च भूभुजस्ससैन्यान् ४४
चापं ध्यानवशाद्धृत्वेद्धमहामोहं महा
त्मे भणे प्रत्यालेप्रसवेक्षुचितनवध्यान
नव्रतालंपुनः पाशं ध्यानवशान्मम
स्तजगतां मत्योर्वशत्वं महादुर्गं स्तंभम
ह्वांकुशास्त्रमननान्मायाममेयां नरेन्
४५ मातस्त्वं कुलनागणेशग्रहगणमहा
योगिनीशाक्तिपीठैः पंचाशद्विश्ववर्णैः
सहितवरकलेवरच्चवादेवताभिः स^
श्रीकंठादिगमे निजविमलतनुः के

शाकाद्यैस्तत्त्वैः सद्भिश्शङ्किर्यवाद्येभगव
ति भवतीं यः स्मरेत्त्वामेव ४६ भगव-
ति तव पादपद्मानि सद्मानि कश्चित् जगति
परिचितसमद्रायरुद्धायनिद्रादिषु श्र
लिरतिकलनाश्लं संगीतभंगीभिरंगी
कृते परिमलमिह किं न वेदेपि सन्देहि
नः ४७ सुरपुरपतिलक्ष्मीः त्वं भवानी
तीन लक्ष्मीः प्रसरति निजदेहे यस्य देवं
त्वमार्ये विविधवक्रकलानां पात्रभूत
स्य तस्य त्रिभुवनविजिताशाङ्गं भजते
स्फूर्तिरिच्छा ४८ क्रमेवुद्धिर्वाचां प
रमविदुषामंबसर्वाणि क्वतेमातर्ब्र
ह्मप्रभृतिविबुधस्तोतवचसाम् अमू
न्येविस्फूर्तिः परतरमहिम्नस्तवगुतिः
प्रसीदत्येतं स्वं वक्रूलमपिवापस्य मिह
मे ४९ संगीतगिरिजे विविचित्रकविता
मामम्नायवाक्यस्फूर्तिं आम्नोनदुदिता
वकीयचरणद्वंद्वं च सर्वज्ञताम् श्रद्धा

त्रि॰
म
८
8

कर्मिणि शर्मा भवेति विष्णुलक्ष्मीजन्मभवनं मं
दिरे सौंदर्यं व पुषि प्रदेहि जगन्नाम वेश्म
नि श्रीशिवे ५० प्रसीद परदेवते मनसि
मे प्रभूतं भयं विदारय दरिद्रतां दल
य देहि सर्वज्ञतां नाम नित्यहिककरुणानि
धे चरणपद्मयुग्मं स्वकं विदारित जरामृ
ते त्रिपुरसुंदरि श्रीशिवे ५१ इति त्रिपु
रसुंदरी स्तुतिमिमां पठेद्यः सुधीः समर्व
दुरितात्‌ टवीपटलं चंडदावानलः भवेत्स
न सिवांछितं प्रथितबुद्धिसिद्धिं लभेद
नेकविधसंपदां पदमनंतपारो भवेत
५२ इ पृथ्वीपालप्रकटमुकुटस्वग्रजोरं
जितांघ्रि विंदमूजानाति नुतिसमाराधि
तो वाधिनारिः विद्याः सर्वाः कलयति
सदा माकरोति प्रवाचां लोकावृत्यै नव
नवपदे रिंदुविंवप्रकाशैः ५३ भूषावे
दुप्रसुघदिनकरकिरणाकारमाका
नतेजः स्वच्छकं भूरिमानं निजननकल

नन्तं गीतं सयोगमार्गम् आद्यन्तं ब्रह्मयो-
न्यं द्दरगिरिविशदां कीर्तिमभ्येत्य भूमौ
देहान्ते ब्रह्मपारं परशिवचरणाकारम
भ्येति विद्वान् ५४ यावद्धीर्दुदिवाक-
शान्तिमध्ययाधारक्तपद्मासनारक्तका-
न्तविराजितांघ्रिलतिकावालेन्दुचूडो-
ज्ज्वला अत्तस्तकपालिपाशाङ्कुशकक-
शायावालभानुप्रभा तां देवीं त्रिपुरां वि-
कां हृदि भजेदिष्टार्थसिद्ध्यै सदा ५५ ब्र-
ह्मा योनिरमास्तु रेश्वरसहृल्लेखाभि-
रूक्तेस्तथा मान्तीं तुं तुमनोमवाग्रवस्त्र-
धामा यामिरुद्धासितैः सोमांशुद्दीप्ति-
शक्तिभिः प्रकटितैर्वीणां गवेदैः क्रमा-
द्वर्णैः श्रीशिवदेशिकेन विदितां विद्या-
न्तवांवाश्रये ५६ या काचित्प्रकृतिः प-
राण्यमयी मायामहामोहिनी काम-
क्रोधविमोहलोभजननी बीजस्वको-
वासिकम् ज्ञानं वैदं वमार्दवं नदत्तलं

त्रि॰
म॰
९

9

ठंठं ममस्तं यथार्थं वंदेदं भवभावबुद्धिरचितं
धंमायतामीश्वरीम् ७८ वन्नभुजेचंद्र
कलावतंसेकुचोन्नतेकुंकुमरागशोः
णे पुंड्रेक्षुपाशांकुशपुष्पबाणहस्ते
नमस्ते जगदेकमातः ७९ अगुणागु
णावास्वयमपिमहांतोपिलब्धवः सकी
लानिष्कीलागुरुभिरुपदिष्टाअपिनवा
प्रसन्नायांदेवित्वयिसकलमंत्राश्चफः
लदास्तरोर्मूलेसिक्तेफलतिविटशाखा
शतमयी ८० दुर्वासस्सामहितदिमस्तु
नीश्वरेणविद्याकलायुवतिमन्मथमू
र्तिनेतत् स्तोत्रंविधायरुचिरंत्रिपुराविः
कायावेदागमोक्तपटलाविदितैकमूर्तिः
८१ सदसदनुग्रहनिग्रहगृहीतमुनिवि
ग्रहोभगवान् सर्वासामुपनिषदांदु
र्वासाजयतिदेशिकःप्रथमः ८२ क
रुणारसपरिपूरितकमलायतनय
नंमणिनूपुरमुखरीकृतरुचिरांघ्रिन

ल्लिनभगाम् धृतवाङ्कवतंसकमणिगु
णाभयवरंवरवर्णिनिवपुरंवन्तेविहः
श्रीकृतहृदयम् ९३ यत्रैवयत्रैवम
नोमदीयंतत्रैवतत्रैवतवस्वरूपम्
यत्रैवयत्रैवशिरोमदीयंतत्रैवतत्रै
वपदद्वयंते ९४ इतिश्रीदुर्वासोमु
नीन्द्रविरचितंत्रिपुरसुन्दरीमहिम्नः
स्तोत्रंसम्पूर्णम् समाप्तम् शुभम्

मा॰
८
१

ॐ श्रीगणेशाय नमः ॐ श्रीगुरवे शिवा
य नमः ॐ मालामन्त्रो महाभाग सर्वसि
द्धिप्रदायकः त्रयोदशसहस्राणां लोक
स्त्रीमोहदायकः यथा मूलेन प्राणाया
मऋष्यादिकरषडङ्गन्यासं विधाय ध्या
नं पठेत मूलं त्रिर्जपित्वा ॐ ऐं ह्रीं श्रीं नमो
महात्रिपुरसुन्दरि श्रीराजराजेश्वरि भ
गवत्यै स्वाहा हृदयदेव्यै स्वाहा शिरो
देव्यै स्वाहा शिखादेव्यै स्वाहा कवचदे
व्यै स्वाहा नेत्रदेव्यै स्वाहा अस्त्रदेव्यै स्वा
हा श्रीकामेश्वर्यै स्वाहा भगमालिन्यै
स्वाहा नित्यक्लिन्नायै स्वाहा १० भेरुण्डा
यै स्वाहा वह्निवासिन्यै स्वाहा महावज्रे
श्वर्यै स्वाहा पराशिवदूत्यै स्वाहा त्वरि
तायै स्वाहा कुलसुन्दर्यै स्वाहा नित्यायै
स्वाहा नीलपताकायै स्वाहा विजया
यै स्वाहा सर्वमङ्गलायै स्वाहा २० ज्वाला
मालिन्यै स्वाहा चित्रायै स्वाहा महानि

साध्यै स्वाहा षोडश्यै स्वाहा कलातीता-
यै स्वाहा समाद्यै स्वाहा अपापरमे-
श्वर्यै स्वाहा एतास्तिथिदेव्यः पान्तु स्वाहा
परमेश्वर्यै स्वाहा मित्रेशमध्ये स्वाहा ३०
षष्ठीशमध्ये स्वाहा उड्डीशमध्ये स्वाहा
चर्यानाथमध्ये स्वाहा लोपामुद्रामध्ये
स्वाहा अगस्त्येशमध्ये स्वाहा कालता
पनमध्ये स्वाहा धर्माचार्यमध्ये स्वाहा
मुक्तकेशेश्वरमध्ये स्वाहा दीपकलाना-
थमध्ये स्वाहा विसुदेवमध्ये स्वाहा ४० प्र-
भाकरदेवमध्ये स्वाहा तेजोदेवमध्ये-
स्वाहा मनोजदेवमध्ये स्वाहा कल्याण
देवमध्ये स्वाहा रत्नदेवमध्ये स्वाहा वा
सुदेवमध्ये स्वाहा एताश्चतुर्दशप्रख्या
देव्यः पान्तु स्वाहा आदिसिद्धगुरुमध्ये
स्वाहा परमेष्ठिगुरुमध्ये स्वाहा परमा-
चार्यगुरुमध्ये स्वाहा ५० परमगुरुमध्ये स्वा
हा श्रीगुरुमध्ये स्वाहा अणिमासिद्धे-

१८
२

मध्यैस्वाहा लघिमासिद्ध्यैस्वाहा महि-
मासिद्ध्यैस्वाहा ईशित्वसिद्ध्यैस्वाहा व-
शित्वसिद्ध्यैस्वाहा प्राकाम्यसिद्ध्यैस्वाहा
भुक्तिसिद्ध्यैस्वाहा इच्छासिद्ध्यैस्वाहा प्रा
प्तिसिद्ध्यैस्वाहा सर्वकामसिद्ध्यैस्वाहा ब्रा
ह्म्यैस्वाहा माहेश्वर्यैस्वाहा कौमार्यैस्वा
हा वैष्णव्यैस्वाहा वाराह्यैस्वाहा माहे
न्द्र्यैस्वाहा चामुण्डायैस्वाहा महालक्ष्म्यै
स्वाहा सर्वसंक्षोभिण्यैस्वाहा सर्वविद्रा
विण्यैस्वाहा सर्वाकर्षिण्यैस्वाहा सर्व
वशंकर्यैस्वाहा सर्वोन्मादिन्यैस्वाहा स
र्वमहांकुशायैस्वाहा सर्वखेचर्यैस्वाहा
सर्वबीजायैस्वाहा सर्वयोन्यैस्वाहा सर्व
त्रिखण्डायैस्वाहा त्रैलोक्यमोहनचक्र
स्वामिन्यैस्वाहा प्रकटयोगिन्यैस्वाहा
कामाकर्षिण्यैस्वाहा बुद्ध्याकर्षिण्यैस्वा
हा अहंकाराकर्षिण्यैस्वाहा शब्दाका-
र्षिण्यैस्वाहा स्पर्शाकर्षिण्यैस्वाहा रू

पाकर्षिण्यै स्वाहा रसाकर्षिण्यै स्वाहा गं
धाकर्षिण्यै स्वाहा चित्ताकर्षिण्यै स्वाहा
धैर्याकर्षिण्यै स्वाहा स्मृत्याकर्षिण्यै स्वा
हा नामाकर्षिण्यै स्वाहा बीजाकर्षिण्यै
स्वाहा आत्माकर्षिण्यै स्वाहा अमृताक
र्षिण्यै स्वाहा शरीराकर्षिण्यै स्वाहा स
र्वाशापूरकचक्रस्वामिन्यै स्वाहा गुप्तयो
गिन्यै स्वाहा अनंगकुसुमायै स्वाहा अ
नंगमेखलायै स्वाहा अनंगमदनायै स्वा
हा अनंगमदनातुरायै स्वाहा अनंग
रेखायै नमः अनंगवेगिन्यै स्वाहा अनं
गांकुशायै स्वाहा अनंगमालिन्यै स्वाहा
सर्वसंक्षोभणचक्रस्वामिन्यै स्वाहा गुप्त
तरयोगिन्यै स्वाहा सर्वसंक्षोभिण्यै स्वा-
हा सर्वविद्राविण्यै स्वाहा सर्वाकर्षिण्यै
स्वाहा सर्वाह्लादिन्यै स्वाहा सर्वसंमोह-
न्यै स्वाहा सर्वस्तंभन्यै स्वाहा सर्वजृंभ-
ण्यै स्वाहा सर्ववशंकर्यै स्वाहा सर्वरं

दे॰ १
3

जिन्यै स्वाहा सर्वोन्मादिन्यै स्वाहा [२०] सर्वा-
र्थसाधकायै स्वाहा सर्वसंपत्तिपूरण्यै-
स्वाहा सर्वमंत्रमय्यै स्वाहा सर्वद्वंद्वक्ष-
यंकर्यै स्वाहा सर्वसौभाग्यदायकचक्र-
स्वामिन्यै स्वाहा संप्रदाययोगिन्यै स्वाहा
सर्वसिद्धिप्रदायै स्वाहा सर्वसंपत्प्रदा-
यै स्वाहा सर्वप्रियंकर्यै स्वाहा सर्वमं-
गलकारिण्यै स्वाहा [३०] सर्वकामप्रदायै-
स्वाहा सर्वदुःखविमोचिन्यै स्वाहा सर्व
मृत्युप्रशमन्यै स्वाहा सर्वविघ्ननिवारि-
ण्यै स्वाहा सर्वांगसुंदर्यै स्वाहा सर्वसौ-
भाग्यदायिन्यै स्वाहा सर्वार्थसाधकच-
क्रस्वामिन्यै स्वाहा कुलोत्तीर्णयोगिन्यै
स्वाहा सर्वज्ञायै स्वाहा सर्वशक्त्यै स्वा-
हा [४०] सर्वैश्वर्यप्रदायिन्यै स्वाहा सर्वज्ञान-
मय्यै स्वाहा सर्वव्याधिविनाशिन्यै स्वा-
हा सर्वाधारस्वरूपायै स्वाहा सर्वपाप-
हरायै स्वाहा सर्वानंदमय्यै स्वाहा स-

धरत्नाग्रहरूपायै स्वाहा सर्वेप्सितफल-
प्रदायै स्वाहा सर्वरत्नाचक्रस्वामिन्यै
नमः निगर्भयोगिन्यै नमः वशिन्यै स्वा
हा कामेश्वर्यै स्वाहा मोदिन्यै स्वाहा
सर्वरोगहरचक्रस्वामिस्वामिन्यै स्वाहा
रहस्ययोगिन्यै स्वाहा वागिन्यै स्वाहा
चापिन्यै स्वाहा पाशिन्यै स्वाहा महांकु
शिन्यै स्वाहा श्रीमहाकामेश्वर्यै स्वाहा ६०
महावज्रेश्वर्यै स्वाहा महाभगमालि-
निमहाश्रीसुन्दर्यै स्वाहा सर्वसिद्धिप्र
दचक्रस्वामिन्यै स्वाहा परातिरहस्ययो
गिन्यै स्वाहा श्रीश्रीमहाभट्टारिकायै
स्वाहा श्रीमहाललितायै स्वाहा सर्वा
नंदमयचक्रस्वामिन्यै स्वाहा परापरा
तिरहस्ययोगिन्यै स्वाहा श्रीश्रीत्रिपुरा
यै स्वाहा त्रिपुरेश्यै स्वाहा त्रिपुरसुंद
र्यै स्वाहा त्रिपुरवासिन्यै स्वाहा त्रिपुरा
श्रियै स्वाहा त्रिपुरमालिन्यै स्वाहा त्रि

दे॰
४

पुरसिद्धायै स्वाहा त्रिपुरांबायै स्वाहा ।
श्रीमहात्रिपुरसुंदर्यै स्वाहा महामाहे
श्वर्यै स्वाहा महासर्वचक्रेश्वर्यै स्वाहा
महासर्वमंत्रेश्वर्यै स्वाहा महासर्वदेव
देवीश्वर्यै स्वाहा महाराज्ञ्यै स्वाहा महा
महाशक्त्यै स्वास्वाहा महामहागुप्त्यै स्वा
हा महामहाज्ञप्त्यै स्वाहा महामहानंदा
यै स्वाहा महामहास्कंदायै स्वाहा महा
महास्पंदायै स्वाहा महामहाह्लादायै
स्वाहा महामहाशयाशयायै स्वाहा ५
महामहाश्रीचक्रनगरीसम्राज्ञ्यै स्वा
हा महामहापरमशिवप्राणायै महा
षोडशीमहाराजराजेश्वर्यै स्वाहा म
हामहाकलेमेश्रीसमादर्पैपै स्वाहा ।
नमस्तेनमस्तेनमस्ते स्वाहा श्रीं ह्रीं पं ॐ
म् ५५ ॥ पञ्चाविद्यामहाविद्यासिद्धिदा
स्तुतिमात्रतः अग्निवानमहाहोमे रा
जराजस्यविप्लवे लुण्ठाकतस्करभ

ये संग्रामे सलिलप्लवे समुद्रयाने विदे
ये भूतप्रेतादिके भये डाकिनीछत्ताकृ
मायक्षकूष्माण्डजं भये अपस्मारज्वा
रव्याधिमृत्युन्मादादिजं भये मित्रभेदे
ग्रहभये व्यसने चाभिचारके अन्ये षपि
व दोषेषु मालामंत्रं स्मरेन्नरः सर्वोप
द्रवनिर्मुक्तः साक्षाच्छिवमयो भवेत् ।
आपत्काले नित्यपूजां विस्तारात्कर्तुम
क्षमः एकवारं जपेद्देनां सर्वपूजाफ
लं लभेत् ॥ इति श्रीविद्यामहात्रि
पुरादेवीमालामंत्रः समाप्त इति शिवम्

ओं श्रीदेव्यै नमः ओं दण्डाधिरूढपरि [पूरि]
नभोगमोक्षामितुप्रसन्नवदनां ज
यदानशीलाम् आराधयामि वकुश
त्रुविनाशिनीं तां पंत्रेश्वरीं विजयिनीं
जयदां नमामि । सुविदैवगरीयसी [दै]
गुणमयी वैगुण्यविध्वंसिनी माया

दे: ५ 5

मोहमदान्धकारशमनीतापत्रयोन्मू-
लिनी वाग्देवीवदनांबुजेविरचितानं-
बोयमन्दीपिका ब्रह्मज्ञानविवेकसि-
द्धिजयिनीविज्ञानमूर्त्यैनमः ॥

1. गणेशकवचं
2. शिवकवचं
3. म[illegible]ष्टकं
4. सहस्रना[illegible]
5. पुरश्चरणविधि
6. कामेश्वरकवचं
7. [illegible]पादुकास्तुतिः
8. यंत्रावलि
9. यं[illegible]
10. श्रीविद्यापद्धतिः
11. [illegible]संस्कारः
12. [illegible]दरीकवचम्
13. त्रैलो. मोहन सुंदरी कवचं
14. [illegible] सुंदरी कवचं
15. सुंदरी सहस्रनाम
16. त्रिपुरा महिम्न
17. [illegible]शक्तिमाला